
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र. M173 विषय वैदिक

नाव. हिरण्यकेशीय प्रयोग महेश्वर भट्टी (Mss).

लेखक/लिपीकार —

पृष्ठ 93 काळ — पूर्ण/अपूर्ण

॥ अथज्ञयोगमहेश्वरभट्टी[illegible]ारंभः ॥ ७ ॥

श्रीगणेशाय नमः ॥ ॐ ॥ प्रणम्य गोपालमनंतमाद्यं नेत्रांजलानंदित
गोपवृंदं ॥ स्मार्तप्रयोगं विदधाति यत्नाद्धिरण्यकेशीयविधौ महेशः ॥
सत्याषाढमुनिं वंदे स्वर्णकेशसमन्वितं । योनुष्ठेयपदार्थानां क्रमकल्प
मकल्पयत् ॥ २ ॥ यत्कृतां वेदवद्वृत्तिमाद्रियंते विपश्चितः ॥ मातृदत्तश्चि
रंजीयाद्वृत्तिरूपेण तत्ववित् ॥ ३ ॥ अथ संस्कारशांतिश्राद्धाख्यप्रकरण
त्रयेण हिरण्यकेशीसर्वस्मार्तकर्मणां प्रयोगोभिधीयते ॥ ॥ तत्राद्ये
संस्कारप्रकरणे गर्भाधानादयः संस्काराः ॥ ॥ द्वितीये शांतिप्रकरणे
वास्तुशमनाद्याः शांतयः ॥ ॥ तृतीये श्राद्धप्रकरणे मासिकश्राद्धा
दिश्राद्धानि चोच्यंते ॥ अथ संस्कारप्रकरणं तत्र प्रथमं षोडशकर्मणां

प्रयोग उच्यते ॥ तानि च ॥ गर्भाधानपुंसवनसीमंतोन्नयनजातकर्म
नामकर्मान्नप्राशनचौलोपनयनवेदव्रतचतुष्टयगोदानसमावर्तनविवा
हपितृमेधाख्यानि ॥ तत्र संस्कारेषु गर्भाधानसंस्कारस्य प्राथम्यादनु
ष्ठानसौकर्यार्थं च सोत्र क्रममुत्सृज्य गर्भाधानादिक्रमेण संस्कारा
णां प्रयोग उच्यते ॥ पितृमेधप्रयोगाः श्राद्धप्रकरणे वक्ष्यते ॥ गर्भा
धानादिचौलांतसंस्काराणामत्ययगतौ प्रायश्चित्ते नापि चरितार्थत्वं ॥
उपनयनादिसंस्काराणां कालातिक्रमे शांति तत्कालातिक्रमप्राय
श्चित्तं कृत्वापि उपनयनादयः संस्कारास्त्ववश्यं कर्तव्या इत्यभिप्राये
णा उपनयनमुखे नैव संस्काराणामाम्नानं कृतं सूत्रकृता ॥ तथा चो

द्वि॰म॰प्र॰ पनयनमारभ्यगौतमसूत्रं ॥ तत्रहरदत्तभाष्यव्याख्या ॥ अत्यगतो
२ गर्भाधानादिसंस्कारलोपप्रायश्चित्तं कृत्वाप्युपनयनंभवति ॥ उप
नयनविनातदुत्तरेसंस्कारानभवंतीत्याभिप्रायेणोपनयनमुखेनसू
त्रितमाचार्येणेति ॥ ॥ रजोदर्शनेसतिस्त्रीत्रिरात्रंस्नानातैलेनाभ्यं
जनंकंकतादिनाक्षरसिलेखनंकज्जलादिनाचक्षुषोरंजनंदंतधा
वनं नखानिनिकृंतनंरज्जूकरणमंजल्यादिजलपानमित्येवमादीनि
नकुर्यात् ॥ ऋतुदर्शनात्षोडशदिनादिऋतुस्तन्मध्येआद्यंरात्रिच
तुष्टयंत्रयंवासंक्रांत्यमावास्याक्षयाहमघामूलादिकंचविहाय २
दंपत्योश्चंद्राद्ययानुकूल्यंचतुर्थेविहितत्वात्चतुर्थादियुग्मदिव

सेगर्भाधानंकार्यं ॥ कर्त्तास्त्रस्नातः कृतमांगलिकःस्वलंकृतःवस्त्राच्छा
दितेपीठेप्राङ्मुखउपविश्यस्नातांस्वच्छवस्त्रपरिधानाभूषणमाल्यानु
लेपनैरलंकृतांप्रथमंशिष्टब्राह्मणकृतसंभाषांभार्यांस्वदक्षिणतउ
पवेश्यआचम्यप्राणानायम्य ॥ ॥ ॐ ॥ सुमुखश्चैकदंतश्चकपि
लोगजकर्णकः ॥ लंबोदरश्चविकटोविघ्ननाशोगणाधिपः ॥ धूम्रके
तुर्गणाध्यक्षोभालचंद्रोगजाननः ॥ द्वादशैतानिनामानियःपठेच्छृणु
यादपि ॥ विद्यारंभेविवाहेचप्रवेशेनिर्गमेतथा ॥ संग्रामेसंकटेचैव
विघ्नस्तस्यनजायते ॥ शुक्लांबरधरंदेवंशशिवर्णंचतुर्भुजं ॥ प्रसन्नव
दनंध्यायेत्सर्वविघ्नोपशांतये ॥ इत्यादिमंगलश्लोकान्पठित्वा ॥ ॐ

हि॰म॰प्र॰ वाणीकमलासनाभ्यां नमः॥ लक्ष्मीनारायणाभ्यां नमः। उमामहेश्वरा
३ भ्यां नमः। शचीपुरंदराभ्यां नमः। मातापितृचरणाभ्यां नमः। इष्टदेवता
भ्यां नमः। कुलदेवताय नमः। वास्तुदेवताभ्यो नमः। ग्रामदेवताभ्यो न
मः। सर्वेभ्यो ब्राह्मणेनमः। ओं विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य
विष्णोरचिंत्यामितवीर्यस्याज्ञया ध्रियमाणयो ब्रह्माउखंडयोर्म
ध्ये भूमंडले जंबूद्वीपे भरतखंडे आर्यावर्ते अविमुक्त वाराणसीक्षेत्रे आ
नंदवने गौरीमुखे त्रिकंटकविराजिते कुमारिकाक्षेत्रे भागीरथ्याः प
श्चिमे देशे अद्य ब्रह्मणो द्वितीयपरार्धे श्वेतवाराहकल्पे वैवस्वतम ३
न्वंतरे अष्टाविंशतियुगचतुष्के कलियुगे प्रथमचरणे बौद्धाव
तारे विक्रमशके अमुकनाम्नी संवत्सरे अ यने ऋतौ मासि पक्षे ति

थौ नक्षत्रे योगे करणे सूर्ये चंद्रे देवगुरौ शेषग्रहेषु यथास्थानस्थितेषु स
त्सु एवंगुणविशेषणविशिष्टायां पुण्यतिथौ शुभतिथौ चेति पाठेन विवि
क्तौ॥ देशकालौ संकीर्त्य॥ ममास्यां भार्यायां प्रतिगर्भसंस्कारातिशय
द्वारा अस्यां जनिष्यमाणगर्भाणां बीजगर्भसमुद्भवैनोनिबर्हणद्वारा
च श्रीपरमेश्वरप्रीत्यर्थं गर्भाधानाख्यं कर्म करिष्ये इति संकल्प्य॥ ॥
तदंगं गणपतिपूजनं पुण्याहवाचनं मातृकापूजनं नांदीश्राद्धं च करि
ष्ये इति संकल्प्य॥ गणपतिं पूजयेत्॥ प्रणवं मंत्रादौ सर्वत्र पठेत्॥ ॐ॥
गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमं॥ ज्येष्ठरा
जं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिः सीद सादनं॥ इति मंत्रे

हि॰मं॰प्र॰ णगणपतयेनमइतिनाममंत्रेणवाआवाहमासनपाद्यार्घ्याचमनस्ना
४ नवस्त्रगंधपुष्पधूपदीपनैवेद्यताम्बूलदक्षिणानमस्कारादिषोडशोप
चारैःपंचोपचारैर्वागणपतिंसंपूज्यपुष्पांजलिंदत्वा॥वक्रतुंडमहा
कायसूर्यकोटिसमप्रभ॥निर्विघ्नंकुरुमेदेवसर्वकार्येषुसर्वदेतिप्रा
र्थनाकार्या॥इतिगणपतिपूजा॥ ॥अथपुण्याहवाचनप्रयोगः॥ ॥
तत्रगर्भाधानादिसर्वकर्मसुआदावंतेचकेषुचितपुण्याहवाचनंवि
हितं॥ब्राह्मणान्नेनेनपरिविष्यपुण्याहंस्वस्त्ययनमृद्धिमितिवाच
यित्वाइत्यादिनासूत्रकृता॥तत्रदेवताकांक्षायांशास्त्रांतरोक्तादे ४
वताउच्यंते॥गर्भाधानस्यादावंतेचब्रह्मा॥पुंसवनस्योभयत्रप्र

जापतिः॥सीमंतस्योभयत्रधाता॥जातकर्मण्युभयत्रमृत्युः॥नामकर्म
णस्यादौसविता॥अंतेप्रजापतिः॥आयुर्वर्धापनस्योभयत्राग्निरायु
ष्मान्॥अन्नप्राशनस्योभयत्रसविता॥चौलस्यादौकेशिनः॥अं
तेप्रजापतिः॥उपनयनस्यादाविंद्रः॥अंतेश्रद्धामेधे॥उपनयनचतुर्थ
दिवसीयपुण्याहवाचनेस्कंभवाः॥पुनरुपनयनस्योभयत्राग्निः॥
ब्रह्मचारिव्रतोपाकरणविसर्गयोरुभयत्रसविता॥ब्रह्मचारिव्रत
लोपप्रायश्चित्तस्योभयत्रसविता॥वेदोपाकरणयोत्सर्जनयोरु
भयत्रसविता॥समावर्तनस्योभयत्रश्रीरिंद्रोवा॥विवाहस्योभय
त्राग्निः॥औपासनोपक्रमेअंतेचाग्निःसूर्यप्रजापतयः॥दर्शपू

हि॰मन्त्र॰ घंजलेनपूरयित्वा॥ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं॥ ईश्व
६ रीं॒ सर्वभूतानांतामिहोपव्हयेश्रियं॥ गंधंप्रक्षिप्य॥ चंदनपुष्पादि
नाभूषयित्वा॥ कांडात्कांडात्प्ररोहंतीपरुषःपरुषःपरि॥ एवानोदू
र्वेप्रतनुसहस्त्रेणशतेनच॥ दूर्वांनिधाय॥ अश्वत्थेवोनिषदनंपर्णे
वोवसतिःकृता॥ गोभाजइत्किलासतयत्सनवथपूरुषं॥ अश्वत्थ
पल्लवंनिधाय॥ अग्नेरेतःश्चंद्रं हिरण्यं। अद्भ्यःसंभूतममृतंप्रजा
सु॥ तत्संभरन्नुत्तरतोनिधाय॥ अतिप्रय छं दुरितितरेयं॥ हिर
ण्यनिधाय॥ बृहस्पतेजुषस्वनोहव्यानिविश्वदेव्य॥ रास्वरत्नानि ६
दाशुषे॥ रत्नानि॥ याःफलिनीर्या अफलाअपुष्यायाश्चपुष्पि

णीः॥ बृहस्पतिप्रसूतास्तानोमुंचंत्वं॒हसः॥ फलान्प्रक्षिप्त्वा॥ युवासु
वासाःपरिवीतआगात्सउश्रेयान्भवतिजायमानः॥ तंधीरासःकवयउ
न्नयंतिस्वाधियोमनसादेवयंतः॥ वस्त्रं॥ पूर्णादर्विपरापतसुपूर्णापुन
रापत॥ वस्नेवविक्रीणावहाइषमूर्जं॒शतक्रतो॥ तंडुलफलसहितपा
त्राभ्यामानेनेपिधाय॥ सर्वत्रप्रतिकलशंमंत्रावृत्त्यारुत्तरसंस्कंच॥ तत्वा
यामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः॥ अहेडमानोवरु
णेहबोध्युरुशं॒समानआयुःप्रमोषीः॥ उत्तरकलशेवरुणमावाह्य।
वरुणायनमइतिगंधपुष्पधूपदीपनैवेद्यादिभिःसंपूज्यदक्षिणांदत्वा
ततोदेवताआवाहयेत्॥ कलशस्यमुखेविष्णुःकंठेरुद्रःसमाश्रिताः॥

मूलेतत्रस्थितोब्रह्मामध्येमातृगणाःस्मृताः॥कुक्षौतुसागराःसर्वेसप्त
द्वीपावसुंधरा॥ऋग्वेदोथयजुर्वेदःसामवेदोह्यथर्वणः॥अंगैश्चसहि
ताःसर्वेकलशंतुसमाश्रिताः॥अत्रगायत्रीसावित्रीशांतिःपुष्टिकरीत
था॥आयांतुममशांत्यर्थंदुरितक्षयकारकाः॥सर्वेसमुद्राःसरितस्ती
र्थानिजलदानदाः॥आयां॰ततःउत्तरकलशेअक्षतांनिक्षिपेत्॥मा
तृदेवोभव॥पितृदेवोभव॥आचार्यदेवोभव॥अतिथिदेवोभव॥अवनि
कृतजानुमंडलःकमलमुकुलसदृशमंजलिंशिरस्याधायदक्षिणेनपा
णिनासुवर्णपूर्णकलशंधारयित्वाशिषःप्रार्थयंते॥प्रार्थय॥एताःस
त्याआशिषःसंतु॥दीर्घानागानद्योगिरयस्त्रीणिविष्णुपदानिचते

नायुःप्रमाणेनपुण्याहंदीर्घमायुरस्तु॥शिवाआपःसंतु॥सौमनस्यमस्तु॥
अक्षतंचारिष्टंचास्तु॥गंधाःपांतु॥सौमंगल्यंचास्तु॥अक्षताःपांतु॥आ
युष्यमस्तु॥पुष्पाणिपांतु॥सौश्रियमस्तु॥तांबूलानिपांतु॥ऐश्वर्यम
स्तु॥दक्षिणाःपांतु॥बहुदेयंचास्तु॥दीर्घमायुःश्रीःशांतिःपुष्टिस्तुष्टि
श्चास्तु॥श्रीर्यशोविद्याविनयोवित्तंबहुपुत्रंचायुष्यंचास्तु॥सर्वत्रब्राह्म
णैरस्त्वितिप्रत्युत्तरंदेयं॥यंकृत्वासर्ववेदयज्ञक्रियाकरणकर्मारंभाः
शुभाःशोभनाःप्रवर्तंते॥तमहमोंकारमादिंकृत्वाऋग्यजुःसामाशीर्व
चनंबह्वृषिमतंसंविज्ञातंभवद्भिरनुज्ञातःपुण्यंपुण्याहंवाचयिष्ये॥
वाच्यतामितिविप्राःवदेयुःउत्तरत्रयथायोग्यं॥यजमानः॥भद्रंकर्णेभि

शृणुयामदेवाः॥भद्रं पश्येमाक्षभिर्यजत्राः॥स्थिरैरंगैस्तुष्टुवांसस्त
नूभिः॥व्यशेमदेवहितं यदायुः॥द्राविणोदाद्रविणसस्तुरस्यद्रविणोदाः
सनरस्यप्रयंसत्॥द्राविणोदावीरवतीमिषंनोद्रविणोदा रासतेदीर्घमा
युः॥सविताप्श्चातात्सवितापुरस्तात्सवितोत्तरात्तात्सविताधरात्ता
त्॥सवितानःसुवतुसर्वतातिंसवितानोरासतांदीर्घमायुः॥नवो
नवोभवतिजायमानोन्हांकेतुरुषसामेत्यग्रे॥भागंदेवेभ्योविदधात्या
यन्प्रचंद्रमास्तिरातिदीर्घमायुः॥उच्चादिविदक्षिणावंतोअस्थुर्येअश्वदाः
सहतेसूर्येण॥हिरण्यदाअमृतत्वंभजंतेवासोदाःसोमप्रतिरंतआयुः
आपउंदंतुजीवसेदीर्घायुत्वायवर्चसे॥यस्त्वाहृदाकीरिणामन्यमा

नोमर्त्यंमर्त्यो जोहवीमि॥जातवेदोयशोअस्मासुधेहिप्रजाभिरग्नेअमृतत्व
मश्यां॥यस्मैत्वंसुकृतेजातवेदउलोकमग्नेकृणवःस्योनं॥अश्विनंसस
पुत्रिणंवीरवंतंगोमंतंरयिन्नशतेस्वस्ति॥संत्वासिंचामियजुषाप्रजामायु
र्धनंच॥व्रतनियमतपःस्वाध्यायक्रतुदमदानविशिष्टानांब्राह्मणानांम
नःसमाधीयतां॥विप्राःसमाहितमनसस्मः॥यजमानःप्रसीदंतुभवंतः॥
प्रसंनास्मइतिविप्राः॥यजमानः॥शांतिरस्तु॥पुष्टिरस्तु॥तुष्टिरस्तु॥वृ
द्धिरस्तु॥अविघ्नमस्तु॥आयुष्यमस्तु॥आरोग्यमस्तु॥शिवंकर्मास्तु॥क
र्मसमृद्धिरस्तु॥वेदसमृद्धिमस्तु॥शास्त्रसमृद्धिरस्तु॥पुत्रसमृद्धि
रस्तु॥धनधान्यसमृद्धिरस्तु॥इष्टसंपदस्तु॥बहिर्देशेअरिष्टनिरस

हि॰म॰प्र॰
९

नमस्तु॥यत्पापंतत्प्रतिहतमस्तु॥यच्छ्रेयस्तदस्तु॥उत्तरेकर्मण्यविघ्नम
उत्तरोत्तरमहरहरभिवृद्धिरस्तु॥उत्तरोत्तराः क्रियाः शुभाः शोभनाःसं
पद्यंतां॥तिथिकरणमुहूर्तनक्षत्रसंपदस्तु॥तिथिकरणमुहूर्तनक्षत्रग्रह
लग्नाधिदेवताः प्रीयंतां॥तिथिकरणेमुहूर्तेनक्षत्रेसग्रहेसदैवतेप्रीयतां॥
अग्निपुरोगाविश्वेदेवाः प्रीयंतां॥इंद्रपुरोगामरुद्गणाः प्रीयंतां॥ब्रह्म
पुरोगासर्वेवेदाः प्रीयंतां॥माहेश्वरीपुरोगाउमामातरः प्रीयंतां॥वसिष्ठ
पुरोगाऋषिगणाः प्रीयंतां॥अरुंधतीपुरोगाएकपत्न्यः प्रीयंतां॥ऋष
यश्छंदांस्याचार्यावेदायज्ञाश्चप्रीयंतां॥ब्रह्मचब्राह्मणाश्चप्रीयंतां॥ ९
श्रीसरस्वत्योप्रीयेतां॥श्रद्धामेधेप्रीयेतां॥भगवतीकात्यायनीप्रीयतां॥

भगवतीमाहेश्वरीप्रीयतां॥भगवतीपुष्टिकरीप्रीयतां॥भगवतीतुष्टिकरी
प्रीयतां॥भगवतीऋद्धिकरीप्रीयतां॥भगवतीवृद्धिकरीप्रीयतां॥भगवं
तोविघ्नविनायकोप्रीयेतां॥भगवान्पर्जन्यः प्रीयतां॥भगवान्स्वामीमहा
सेनः सपत्निकः ससूतः सपार्षदः सर्वस्थानगतः प्रीयतां॥हरिहरहिर
हिरण्यगर्भाः प्रीयंतां॥सर्वाग्रामदेवताः प्रीयंतां॥सर्वाः कुलदेवताः प्री
यंतां॥सर्वावास्तुदेवताः प्रीयंतां॥बहिरपः॥हताब्रह्मद्विषः॥हताअस्य
कर्मणोविघ्नकर्तारः॥शत्रवः पराभवंयांतु॥शाम्यंतुघोराणि॥शाम्यं
तुघोराणि॥शाम्यंतुपापानि॥शाम्यंत्वीतयः॥शुभानिवर्द्धंतां॥शिवा
आपः संतु॥शिवाऋतवः संतु॥शिवाअग्नयः संतु॥शिवाआहुतयः सं

हि॰म॰ग्र॰ तु॥शिवाओषधयः संतु॥शिवावनस्पतयः संतु॥शिवाअतिथयः संतु।
१० अहोरात्रेशिवेस्यातां॥निकामेनिकामेनः पर्जन्योवर्षतु॥फलिन्योनओ
षधयः पच्यंतां योगक्षेमोनः कल्पतां॥शुक्रांगारकबुधबृहस्पतिश
नैश्चरराहुकेतुसोमसहितआदित्यपुरोगाः सर्वेग्रहाः प्रीयंतां॥भगवा
न्नारायणः प्रीयतां॥भगवान्पर्जन्यः प्रीयतां॥भगवान्स्वामीमहासे
नः पुण्याहकालान्वाचयिष्ये।वाच्यतामितिविप्राः॥उद्गातेवशकुने
सामगायसिब्रह्मपुत्रइवसवनेषुशंससि॥वृषेववाजीशिशुमती
रपीत्या सर्वतोनः शकुनेभद्रमावदविश्वतोनः शकुनेपुण्यमाव १०
द॥याज्ययायजतिप्रतिवैयाज्या पुण्येवलक्ष्मीः पुण्यामेवतल्लक्ष्मी

संभावयतिपुण्यांलक्ष्मीं संस्कुरुते॥यत्पुण्यंनक्षत्रं॥तद्बट्कुर्वीतोपव्यु
षं॥दायेवैसूर्यउदेति॥अथनक्षत्रंनै ति॥यावतिसूर्योगच्छेत्॥यत्र नत्र
जघन्यंपश्येत्॥तावतिकुर्वीतयत्कारीस्यात्॥पुण्याहएवकुरुते॥ता
निवाएतानियमनक्षत्राणि॥यान्येवदेवनक्षत्राणि॥तेषुकुर्वीतयत्कारी
स्यात्॥पुण्याहएवकुरुते॥मह्यंसहकुटुंबिनेमहाजनान्नमस्कुर्वाणा
याशीर्वचनमपेक्षमाणायामुककर्मकारिणेपुण्याहंभवंतोब्रुवंतु॥इ
तित्रिर्यजमानः।ॐपुण्याहमितित्रिर्विप्राः॥अत्रपुण्याहादयः शब्दाःप्र
तिवचनेप्रथमैकवचनांताएवभवंति॥तेषांस्वपरत्वात्॥स्वस्तयेवायु
मुपब्रवामहैसोमंस्वस्तिभुवनस्ययस्पतिः॥बृहस्पतिंसर्वगणंस्वस्त

य स्वस्तय आदित्यासो भवंतु नः॥ आदित्य उदयनीयः पथ्ययैवेतः स्व
स्त्या प्रयंति पथ्यां स्वस्तिमभ्युद्यंति स्वस्त्यै वेतः प्रयंति स्वस्त्युद्यंति स्वस्त्यु
द्यंति॥ स्वस्तिन इंद्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः॥ स्वस्तिनस्ता
र्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥ अष्टौ देवा वसवः सोम्या
सः॥ चतस्रो देवीरजराश्रविष्ठाः॥ ते यज्ञं पातु रजसः परस्तात्॥ सं
वत्सरीणममृतं स्वस्ति॥ मत्यमित्यादि अमुककर्मकारिणे स्वस्ति भवं
तो ब्रुवंतु॥ इति त्रिर्यजमानः॥ आयुष्मते स्वस्तिरिति त्रिर्विप्राः॥ ऋध्या
मस्तोमं सनुयाम वाजमा नो मंत्रं सरथेहोपयातं॥ यशो न पक्वं मधु ११
गोष्वंतरा भूतांशो अश्विनोः काममप्राः॥ सर्वामृद्धिमृध्नुयामिति

तं वै तेजसे व पुरस्तात्पर्यभवच्छंदोभिर्मध्यतोक्षरैरुपरिष्टाद्गायत्र्या सर्व
द्वादशाह परिभूय सर्वामृद्धिमार्ध्नोत्सर्वामृद्धिमृध्नोति य एवं वेद॥ ऋ
ध्यास्म हव्यैर्नमसोपसद्य॥ मित्रं देवं मित्रधेयन्नो अस्तु॥ अनूराधा
न्हविषा वर्धयंतः॥ शतं जीवेम शरदः सवीराः॥ त्रीणि त्रीणि वै देवा
नामृद्धानि॥ त्रीणि छंदांसि॥ त्रीणि सवनानि॥ त्रय इमे लोकाः॥ ऋ
ध्यामेवतद्वीर्य एषु लोकेषु प्रतितिष्ठति॥ मत्यमित्यादि अमुककर्म
कारिणे ऋद्धिं भवंतो ब्रुवंतु इति त्रिर्यजमानः॥ ऋध्यामेति प्रतिवच
नं त्रिः॥ श्रिये जातः श्रिय आनिर्याय श्रियं वयो जरितृभ्यो दधाति॥
श्रियं वसाना अमृतत्वमायन्भवंति सत्यासमिता मितद्रौ॥ श्रि

यएवैनंताक्षियामादधातिसंततमन्वावषट्कृत्यंसंतत्यैसंधीयतेप्र
जयापशुभिर्यएवंवेद॥यस्मिन्ब्रह्माभ्यजयत्सर्वमेतत्॥अमुंच्लो
कमिदमूचसर्वं॥तन्नोनक्षत्रमभिजिद्विजित्य॥श्रियंदधात्वहृणीय
मानं॥अहेबुध्नियमंत्रंमेगोपाय॥यमृषयस्त्रयिविदाविदुः॥ऋचः
सामानियजूंषि॥साहिश्रीरमृतासतां॥एभिर्मंत्रैःसुवासिनीभिर्नी
राजनंकारयति॥मह्यमित्यादिअमुककर्मकारिणश्रीरस्त्वितिभ
वंतोब्रुवंतुइतित्रिर्यजमानः॥ॐअस्तुश्रीरितिप्रतिवचनंत्रिः॥वर्ष
शतंपूर्णमायुरस्तु॥शिवंकर्मास्तु॥गोत्राभिवृद्धिरस्तु॥ब्रह्मश्रीय १२
तां॥कर्मांतरेपुण्याहवाचनेयथोक्तादेवताग्राह्याः॥शुक्रैभिरंगैर

जआततन्वान्क्रतुंपुनानः कविभिःपवित्रैः॥शोचिर्वसानःपर्यायुरपां
श्रियोमिमीतेबृहतीरनूनाः॥तदप्येषश्लोकोभिगीतोमरुतःपरिवेष्टा
रोमरुत्तस्यावसन्गृहे॥आविक्षितस्यकामप्रेर्विश्वेदेवाःसभासदइ
ति॥ततउत्तरकलशंदक्षिणहस्तेदक्षिणमुत्तरेगृहीत्वा॥ताभ्यांधा
राद्वयंसंततंपात्रेनिषिंचेदभिर्मंत्रैः॥वास्तोष्पतेप्रतिजानीह्यस्मा
न्स्वावेशोअनमीवोभवानः॥यत्वेमहेप्रतितन्नोजुषस्वशंनएधिद्वि
पदेशंचतुष्पदे॥वास्तोष्पतेप्रतरणोनएधिगयस्फानोगोभिरश्वे
भिरिंदो॥अजरासस्तेसख्येस्यामपितेवपुत्रान्प्रतिनोजुषस्व॥वास्तो
ष्पतेशग्मयासंसदातेसक्षीमहिरण्वयागातुमत्या॥आवःक्षेमउतयो

हि॰म॰प्र॰
१३

गवरंनोयूयंपातस्वस्तिभिः सदानः॥ अमीवहावास्तोष्पतेविश्वारूपा
ण्याविशन्॥ सखासुशेवएधिनः॥ निबंधिवं॥ ततः कर्त्तावामतः प
त्नीमुपवेश्यपात्रेपातितजलेनपल्लवदूर्वाभिरुदङ्मुखाविप्रा अभिषिं
चेयुः स्तिष्ठंतः॥ समुद्रज्येष्ठाः सलिलस्यमध्यात्पुनाना यंत्यनिविशमा ल
नाः॥ इंद्रोयावज्रीवृषभोरराद्ताआपोदेवीरिहमामवंतु॥ याआपो
दिव्याउतवास्रवंतिखनित्रिमाउतवायायस्वजाः॥ समुद्रार्थायाः शुच
यःपावकास्ताआपो॰ यासांराजावरुणोयातिमध्येसत्यानृतेअव
पश्यंजनानां॥ मधुश्चुतः शुचयोयाः पावकास्ताआपो॰ यासुराजा १३
वरुणोयासुसोमोविश्वेदेवायासूर्जंमदंति॥ वैश्वानरोयास्वग्निः

प्रविष्टः स्ताआपोदेवीरिहमामवंतु॥ त्रायंतामिहदेवास्त्रायतांमरुतां
गणाः॥ त्रायंतांविश्वाभूतानियथायमरपाअसत्॥ आपइद्वाउ
भेषजीरापोअमीवचातनीः॥ आपः सर्वस्यभेषजीस्तास्तेकृण्वंतु
भेषजं॥ हस्ताभ्यांदशशाखाभ्यांजिह्वावाचःपुरोगवी॥ अनामयि
त्नुभ्यात्वाताभ्यांत्वोपस्पृशामसि॥ इमाआपः शिवतमाइमाः सर्व
स्यभेषजीः॥ इमाराष्ट्रस्यवर्धनीरिमाराष्ट्रभृतोमृताः॥ याभिरिंद्रमभ्यषि
चत्प्रजापतिः सोमंराजानंवरुणंयमंमनुं॥ ताभिरद्भिरभिषिंचामित्वा
महंराज्ञांत्वमधिराजोभवेह॥ महांतंत्वामहीनांसम्राजंचर्षणीनां॥
देवीजनित्र्यजीजनद्भद्राजनित्र्यजीजनत्॥ देवस्यत्वासवितुःप्रसवेश्वि

नोर्बाहुभ्यां पूष्णोहस्ताभ्यामग्नेस्तेजसासूर्यस्य वर्चसेंद्रस्येंद्रियेणा
भिषिंचामि॥ बलायश्रियेयशसेन्नाद्याय॥ देवस्यत्वासवितुःप्रस
वे॥ अश्विनोर्बाहुभ्यां। पूष्णोहस्ताभ्यां॥ अश्विनोर्भैषज्येन॥ तेजसे
ब्रह्मवर्चसायाभिषिंचामि॥ देवस्य॰ हस्ताभ्यां॥ सरस्वत्यै
भैषज्येन॥ वीर्यायान्नाद्यायाभिषिंचामि॥ देवस्यत्वा॰ भ्यां॥ इंद्रस्येंद्रि
येण॥ श्रियेयशसेबलायाभिषिंचामि॥ देवस्यत्वा॰ हस्ताभ्यां॥ सरस्व
त्यैवाचोयंतुर्यंत्रेणाग्नेस्त्वासाम्राज्येनाभिषिंचामीद्रस्यबृहस्पते
स्त्वासाम्राज्येनाभिषिंचामि॥ सुरास्त्वामभिषिंचंतु ब्रह्मविष्णुमहे
श्वरः॥ वासुदेवोजगन्नाथस्तथासंकर्षणोविभुः॥ प्रद्युम्नश्चानि १४

रुद्धश्चभवंतुविजयायते॥ आखंडलोग्निर्भगवान्यमोवैनिर्ऋतिस्तथा॥
वरुणःपवनश्चैवधनाध्यक्षस्तथाशिवः॥ ब्रह्मणाःसहिताः सर्वेदिक्
पालाःपांतुतेसदा॥ कीर्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिःश्रद्धाक्रियामती॥ बु
द्धिर्लज्जावपुःशांतिः कांतिःपुष्टिश्चमातरः॥ एतास्त्वामभिषिंचंतु देव
पत्न्यःसमागताः॥ आदित्यश्चंद्रमाभौमोबुधजीवसितार्कजाः॥ ग्रहा
स्त्वामभिषिंचंतुराहुकेतुश्चपूजिताः॥ देवदानवगंधर्वायक्षराक्षसपन्न
गाः॥ ऋषयोमुनयोगावोदेवमातरएवच॥ देवपत्न्योद्रुमानागादैत्याश्चा
प्सरसांगणाः॥ अस्त्राणिसर्वशस्त्राणिराजानोवाहनानिच॥ औषधा
निचरत्नानिकालस्यावयवाश्चये॥ सरितःसागराःशैलास्तीर्थानिज

हि॰मं॰प्र॰ लदानदाः॥ एतेस्त्वामभिषिंचंतु सर्वकामार्थसिद्धये॥ भूर्भुवः सुवः अम
१५ ताभिषेकोस्तु॥ ततः आचार्यप्राप्तवस्त्रादिदानं॥ तत्परिधानं॥ युवा
सुवासाः परिवीत आगात्स उश्रेयान्भवतिजायमानः॥ तंधीरासः कवय
उन्नयंतिस्वाधियोमनसादेवयंतः॥ इतिपुण्याहवाचनप्रयोगः॥ ॥
अथमातृकापूजा॥ गौरीपद्मा शचीमेधा सावित्री विजयाजया॥ देव
सेना स्वधास्वाहा मातरोलोकमातरः॥ धृतिः पुष्टिस्तथातुष्टिरात्मनः
कुलदेवता॥ ब्राह्मीमाहेश्वरीचैवकौमारीवैष्णवीतथा॥ वाराहीचतथें
द्राणीचामुंडाः सप्तमातरः॥ एताः गणपतिसहिताश्चतुर्विंशत्यक्षतपुं १५
जेष्वावाह्य॥ नर्यप्रजांमेगोपाय॥ अमृतत्वायजीवसे॥ जातांजनिष्यमा

णांच॥ अमृतेसत्येप्रतिष्ठितां॥ इतिप्रतिष्ठाप्य॥ नाममंत्रैः षोडशोपचा
रैः पंचोपचारैर्वासंपूज्य॥ गौरीर्मिमायसलिलानितक्षत्येकपदी द्विप
दीसाचतुष्पदी॥ अष्टापदीनवपदीबभूवुषीसहस्त्राक्षरापरमेव्यो
मन्॥ इतिपुष्पांजलिंदत्वा॥ यांतुदेवगणाः सर्वेपूजामादायपार्थिवी॥
इष्टकामप्रसिध्यर्थंपुनरागमनायचेति विसर्जयेत्॥ अथनांदीश्रा
द्धं॥ ॥ सदूर्वांकुरानक्षतान् जलंचादाय॥ सत्यवसुसंज्ञकाविश्वेदे
वानांदीमुखाः भूर्भुवः स्वः इदंवः पाद्यंस्वाहानमद्दयंचवृद्धिः॥ मातृपि
तामहीप्रपितामह्यः नांदीमुख्यः भूर्भुवः स्वः इदंवः पाद्यमियंचवृ
द्धिः॥ पितृपितामहप्रपितामहानांदीमुखाः भूर्भुवः इदंवः पाद्यमियं स्वः

वृद्धि॥ मातामहमातुः पितामहमातुः प्रपितामह्यः पत्नीसहितानांदी
मुखाः भूर्भुवः स्वः इदं व॰ द्धि॥ सत्यवसुसंज्ञका विश्वेदेवानांदीमुखाः
भूर्भुवः स्वः इदं वः आसनगंधाद्युपचारकल्पनं स्वाहा नमइयं चवृ
द्धि॥ मातृपितामही प्रपितामह्यः नांदीमुख्यः भूर्भुवः स्वः इदं वः
आस॰ द्धि॥ पितृपितामहप्रपितामहानांदीमुखाः भूर्भुवः स्वः इदं वः
आ॰ द्धि॥ मातामहमातुः पितामहमातुः प्रपितामह्यः पत्नीसहिताः
नांदीमुखाः भूर्भुवः स्वः इदं वः आसन॰ द्धि॥ गौर्यादिषोडशमात
रः ब्राह्म्यादिसप्तमातरः गणपतिसहिताश्च भूर्भुवः स्वः इदं वः दास्य १६
मानयुग्मब्राह्मणभोजनपर्याप्तमन्नं हिरण्यं वा यथाशक्तिं स्वाहा

नमइयं चवृद्धि॥ सत्यवसुसंज्ञका विश्वेदेवानांदीमुखाः भूर्भुवः स्
वः इदं वः दास्यमानं यथाकालं युग्मब्राह्मणभोजनपर्याप्तमन्नं नि
ष्क्रयभूतं यथाशक्ति हिरण्यं स्वाहा नमइयं चवृद्धि॥ मातृपितामही
प्रपितामह्यः नांदीमुख्यः भूर्भुवः सुवः इदं वः दास्यमानं॰ द्धि॥ पितृपिता
महप्रपितामहानांदीमुखाः भू॰ द्धि॥ मातामहमातुः प्रपितामहमातुः
प्रपितामह्यः पत्नीसहितानांदीमुखाः भू॰ द्धि॥ ततः॥ उपास्मैगायतान
रः पवमानायेंदवे॥ अभिदेवांइयक्षते॥ अभिलमधुनापयोथर्वाणो अशि
श्रयुः॥ देवंदेवायदेवयु॥ सनः पवस्वशंगवेशंजनायशमर्वते॥ शंराजं
नोषधीभ्यः॥ बभ्रवेनुः स्वतवसेरुणायदिविस्पृशे॥ सोमायगाथमर्च

ल॥ हृस्तच्युतेभिरद्भिः सुतंसोमंपुनीतन॥ मधावाधावतामधु॥ कृ
तस्यनांदीश्राद्धस्यप्रतिष्ठाफलसिध्यर्थंद्राक्षामलकतंनिष्क्रयीभूतंहि
रण्यंवास्वाहानमइयचवृद्धिः॥ प्रजापतेनत्वदेतान्यन्योविश्वाजातानि
परिताबभूव॥ यत्कामास्तेजुहुमस्तंनोअस्तुवयंस्यामपतयोरयीणां॥
कृतेननांदीश्राद्धेननांदीमुखदेवताः प्रीयंतां वृद्धिः॥ मातापितामहीचैव
तथैवप्रपितामही॥ पिता पितामहश्चैवतथैवप्रपितामहाः॥ मातामहस्त
त्पिताचप्रमातामहतादयः॥ एतेभवंतुसुप्रीताः प्रयच्छंतुचमंगलं॥ इति
संप्रार्थ्य॥ इळामग्नेपुरुदंसंसनिंगोः शश्वत्तमंहवमानायसाध॥
स्यान्नः सूनुस्तनयोविजावाग्नेसातेसुमतिर्भूत्वस्मे॥ नाणकमादा

त्रेबादयेत॥ ततोनिषिद्धतिथिवारादोरजोदर्शनेसतिशांतिप्रकरणोक्तरी
त्याशांतिकंकार्यं॥ ततःगर्भाधानकर्मणः सांगतासिध्यर्थंदशाधिकान्ब्रा
ह्मणान्यथाकालंयथोपपंनेनान्नेनभोजयिष्येइतिसंकल्प्यभोज
येत॥ कृतस्यकर्मणः सांगतासिध्यर्थंनानानामगोत्रेभ्योगंधतांबूलादि
दानभूयसींदक्षिणांचदातुमहमुत्सृज्यइतिसंकल्पदद्यात्॥ ततःप्रमादा
त्कुर्वतांकर्मप्रच्यवेताध्वरेषुयत्॥ स्मरणादेवतद्विष्णोः संपूर्णंस्यादिति
श्रुतिरितिकर्मसाद्गुण्यायविष्णुस्मरेत॥ ततःशिष्टैरिष्टैश्चसहभुंजीयातां॥
ततोरात्रौकृतावश्यकक्रियः॥ आचम्यस्वच्छवस्त्रपरिधानोभार्यांसम्यगा
स्तृतेपर्यंकेशयनार्थमुपव्हयतेनवभिर्मंत्रैः॥ विष्णुर्योनिंकल्पयतुत्व

ष्टारूपाणिपिंशतु॥आसिंचतुप्रजापतिर्धातागर्भंदधातुते॥१॥गर्भंधे
सिनीवालिगर्भंधेहिसरस्वति॥गर्भंतेअश्विनावुभावाधत्तांपुष्करस्रजौ॥
॥२॥हिरण्ययीअरणीयंनिर्मंथतोअश्विना॥तंतेगर्भंहवामहेदश
मास्यायसूतवे॥३॥यथाग्निगर्भापृथिवीद्यौर्यथेंद्रेणगर्भिणी॥वा
युर्यथादिशांगर्भएवंगर्भंदधामिते॥४॥यस्ययोनिंप्रतिरेतोगृहाण
पुमान्पुत्रोजायतांगर्भोअंतः॥तंमातादशमासोबिभर्तुसजायतांवी
रतमस्वानां॥५॥आतेगर्भोयोनिमेतुपुमान्बाणइवेषुधिं॥आवी
रोअत्रजायतांपुत्रस्तेदशमास्यः॥६॥करोमितेप्राजापत्यमागर्भोयो १८
निमेतुते॥अनूनःपूर्णोजायतामनंधोश्लोणोपिशाचधीरः॥७॥॥

यानिप्रभूनिवीर्याण्यृषभा[illegible]जयंतुनः॥तेस्त्वंगर्भिणीभवसजायतांवीर
तमस्वानां॥८॥योवशायांगर्भोयश्चवेहत्तींद्रस्तान्निदधेवनस्पतौ॥ते
नत्वंगर्भिणीभवसाप्रसूर्धेनुभवेति॥९॥ततउपयच्छते॥संनाम्नःस
ंहृदयानिसंनाभिःसंत्वचः॥संत्वाकामस्ययोक्त्रेणयुंजान्यविमोचना
येति॥ततस्तांपर्यालिंगयति॥मामनुव्रताभवसहचर्यामयाभव॥यानि
पतिघ्नीतनूर्जारघ्नीत्वेतांकरोमिशिवात्वंमह्यमेधिक्षुरपविर्जारेभ्यइ
ति॥ततोमंत्रत्रयेणवारत्रयंरेतोस्कंदनंकार्यं॥भूःप्रजापतिनात्यृषभेणा
स्कंदयामिवीरंधत्स्वासौ॥भुवःप्रजापतिना॰सौ॥सुवःप्रजा॰सौ॥अ
धिकंचेत्तूष्णीमेवावस्कंदयेत्॥अत्रसर्वत्रमंत्रेअसावितिपदंपरिज्य

ज्य संबुध्या संस्कार्यो नामग्राह्यं ॥ क्षेत्र संस्कारकृत्वात् सकृन्मंत्रः सकृ
द्यं संस्कारकार्यः ॥ ॥ इति श्री सत्याषाढ हिरण्यकेशी स्मार्त प्रयोगर
त्ने वैशंपायन महेश्वरभट्ट कृतौ संस्कार प्रकरणे गर्भाधान प्रयोगः ॥ ॥
अथ पुंसवन प्रयोगः ॥ तृतीये मासि शुक्ल पक्षे पुण्य नक्षत्रे पुनर्वसू पुष्या
भिजिद्धस्त प्रोष्ठपदानूराधाश्विनी मूल श्रवण रेवती रोहिणी मृगसंज्ञका
न्यन्यतमे पुंनक्षत्रे चंद्रानुकूल्ये कार्यं ॥ कर्त्ताकृतनित्यः क्रियः प्राङ्मुखउ
पविश्य स्वदक्षिणतो भार्यां चोपविश्य आचम्य प्राणानायम्य देशका
लो संकीर्त्य ममास्यां भार्यायां विद्यमान गर्भस्य पुंस्त्व प्रतिपादन द्वारा
बीजगर्भसमुद्भवैनो निबर्हण द्वारा क्षेत्र संस्कार द्वारा च श्री परमेश्वर

प्रीत्यर्थं पुंसवनाख्यं कर्म करिष्ये ॥ तदंगं गणपति पूजनं पुण्याहवाचनं
नांदीश्राद्धं च करिष्ये इति संकल्प्य ॥ गर्भाधानोक्त रीत्या कुर्यात् ॥ ततः
पुंसवनांगमुद्धननादि कर्म करिष्ये इति संकल्प्य ॥ ततः शर्करास्थ्यादि
रहितं हस्तमात्रायतं सिकताग्नरूपपंचक निर्मितं चतुरंगुलोच्छ्रायं सम
चतुरस्रं प्रागुदग्वा प्रवणं समं वा स्थंडिलं हस्तमात्रं बाहुमात्रं वा विधा
याग्निमादाय तूष्णीमुद्धत्य समंत्रं वा वारात् ॥ उद्धन्यमानमस्या अमे
ध्यं ॥ अपपाप्मानं यजमानस्य हंतु ॥ शिवानः संतु प्रदिशश्चतस्रः ॥ शंनो
मातापृथिवी तोकसातेति प्रागादिक्रमेणोद्धत्य ॥ ततः तिस्रः प्राचीस्ति
स्र उदीचीरेखाः कृत्वा ॥ शंनोदेवीरभिष्टये ॥ आपोभवंतु पीतये ॥ शंयो

रभिस्रवंतुनः॥कृत्स्नमग्न्यायतनंस्रुवेनपाणिनावास्वारादवोक्ष्य॥ततः
प्रागारभ्येंद्राद्यष्टौलोकपालानावाहयति॥इंद्रायनमः॥अग्नयेन॰यमा
य॰निर्ऋतये॰वरुणाय॰वायवेनम॰सोमाय॰ईशानाय॰मध्ये॥वैश्वा
नरस्यरूपं॥पृथिव्यांपरिस्रसा॥स्योनमाविशंतुनः॥भूर्भुवःस्वरोम्॥
पवमाननामानमग्निंप्रतिष्ठापयामिइतिप्रतिष्ठाप्य॥चत्वारिशृंगात्र
यो॥अस्यपादाद्वेशीर्षे॰यत्राग्निमुपसमाधायेतिसूत्रकृदाह॥तत्रोद्ध
ननाद्यग्निप्रतिष्ठांतोविधिरितिवृत्तिकृत॥अन्यत्रवायतनेपरिसमूह
नपरिस्तरणादिकृत्वाकर्मकार्यं॥प्रज्वाल्यसमित्त्रयमादाय॥ॐश्रद्धे
हिसत्येनत्वाह्वयामिइतिस्रुवार्यं॥याःपुरस्तात्प्रस्रवंत्युपरिष्टात्सर्व

तस्रवयाः॥ताभीरश्मिपवित्राभिःश्रद्धांयमारभे॥आकूत्यैत्वाकामायत्वासमृ
धेत्वापुरोदधेअमृतत्वायजीवसे॥आकूतिमस्यावसेकाममस्यसमृध्यै॥इं
द्रस्ययुंजतेधियः॥आकूतिंदेवीमनसःपुरोदधेयज्ञस्यमातासुहवामे
अस्तु॥यदिच्छामिमनसासकामोविदेयमेनद्धृदयेनिविष्टं॥हृदयमाल
भ्य॥अपउपस्पृश्यप्राणानायम्य॥पुंसवनहोमकर्मणीयक्ष्यमाणादे
वताःपरिग्रहीष्यामि॥जातवेदसमग्निमिध्मेन॥आघारहोमे॥प्रजाप
तिमनुमिंद्रंचाज्येन॥आज्यभागहोमे॥अग्निंसोमंचाज्येन॥सामान्यप्र
धानाज्यहोमे॥अग्निंजातवेदसंसंराधनींसंराधनींदेवींप्रसाधनींदे
वींव्याहृतीनामग्निंवायुंसूर्यंप्रजापतिंचाज्येन॥वैशेषिकप्रधानहोमे॥

हि॰म॰प्र॰ २१

धातारंचतुराज्येन॥ अंगहोमे॥ वरुणंद्विरग्नीवरुणौद्विरयासमग्निंप्रजाप
तिंचाज्येन॥ जयहोमे॥ चित्तंचित्तिमाकूतमाकूतिंविज्ञातंविज्ञानंमनःश
क्करीःदर्शपूर्णमासंबृहद्रथंतरंप्रजापतिंचाज्येन॥ अभ्यातानहोमे॥ अग्निं
भूतानामधिपतिंइंद्रंज्येष्ठानामधिपतिंयमंपृथिव्याधिपतिंवायुंअंतरि
क्षस्याधिपतिंसूर्यंदिवोधिपतिंचंद्रमसंनक्षत्राणामधिपतिंबृहस्पतिं
ब्रह्मणोधिपतिंमित्रंसत्यानामधिपतिंवरुणंअपामधिपतिंसमुद्रंस्रोत्या
नामधिपतिंअन्नंसाम्राज्यानामधिपतिंसोमंओषधीनामधिपतिं
सवितारंप्रसवानामधिपतिंरुद्रंपशूनामधिपतिंउदकस्पर्शः॥ त्वष्टा २१
रंरूपाणामधिपतिंविष्णुंपर्वतानामधिपतिंमरुतोगणानामधिपतीन्

प्राचीनावीतिपितॄन्पितामहान्परान्वरांश्चाज्येनयक्ष्ये॥ उदकस्पर्शः॥ रा
ष्ट्रभृद्धोमे॥ अग्निंगंधर्वंओषधीरप्सरसः॥ सूर्यंगंधर्वंमरीचीरप्सरसः॥
चंद्रमसंगंधर्वंनक्षत्राण्यप्सरसः॥ यज्ञंगंधर्वंदक्षिणाप्सरसः॥ मनो
गंधर्वंऋक्सामाऽप्सरसः॥ वातंगंधर्वंअपोप्सरसः॥ भुवनस्यपतिंमृत्युंगं
धर्वंविश्वमप्सरसः॥ ×न्य× पर्जन्यंगंधर्वंविद्युतोप्सरसः॥ अमृडयमृ
त्युंगंधर्वंप्रजाअप्सरसः॥ कामंगंधर्वंआधीरप्सरसः॥ सनोभुवनस्यपति
श्चमाज्येनयक्ष्ये॥ स्विष्टकृद्धोमे॥ अग्निंस्विष्टकृतंहुतःशेषमाज्येनयक्ष्ये॥
सामान्यप्रायश्चित्तहोमे॥ अग्निंत्रिराज्येनअग्नीवरुणौद्विराज्येनइंद्रंद्विरा
ज्येनत्र्यंबकंविष्णुंअग्निंवायुंसूर्यंबृहस्पतिंवरुणंइंद्रंविश्वान्देवान्प्रत्येकं

माज्येन॥सꣳस्रावहोमे॥वसून्रुद्रानादित्यान्सꣳस्रावेणाज्येन यक्ष्ये
एता देवतासर्वाज्येन यक्ष्ये इत्युक्त्वा॥ओं भूर्भुवः स्वः स्वाहा समिधोऽग्नावा
धाया॥प्रजापतयइदं॥ततः एषहिदेवः प्रदिशोनुसर्वाः पूर्वोहिजातः स
उगर्भेअंतः॥सविजायमानः सजनिष्यमाणः प्रत्यङ्मुखास्तिष्ठति विश्व
तोमुखः॥इति वायुदिशमारभ्य निर्ऋतिपर्यंतमुदकधारया सिंच त्वाग्निमाचा
रात्सन्मुखीकृत्य॥ततोयथाहतद्वसवोगौर्यंचित्पदिषिताममुंचता
यजत्राः॥एवात्वमस्मत्प्रमुंचाव्यꣳहः प्रातार्यग्ने प्रतरान्नआयुरिति
हस्तेन ईशानीमारभ्य ईशान्यंतं सर्वतः परिसमूह्य इत्याचारात्॥ततः
प्रागादिक्रमेण प्रदक्षिणं प्रागग्रैर्दर्भैः प्राग्दक्षिणतः पश्चादुत्तर इति

परिस्तृणाति॥अथवा॥प्राक्पश्चादुदगग्रान्दक्षिणानुत्तरानुत्त
रानधरांश्च कृत्वाप्रदक्षिणमग्निं परिस्तीर्य॥दक्षिणतो ब्रह्मायतने कु
शानास्तीर्य सकुशं दक्षिणहस्तं हृदि कृत्वात्मीयमग्निमात्मनि ध्यायति॥
मयिगृह्णाम्यग्रे अग्निꣳ रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय॥मयि
प्रजां मयिवर्चो दधाम्यरिष्टास्याम तनुवा सुवीराः॥योनोऽग्निः पितरो
हृत्स्वंतरमर्त्यो मर्त्याꣳ आविवेश॥तमात्मन्परिगृह्णीमहे वयं मासो अ
स्माꣳ अवहायपरागात्॥इतिततः उत्तरेणाग्निं दर्भानास्तीर्य पात्रासाद
नं कार्यं॥अत्र स्थालीपाकसमावर्तनाष्टकादि दैवमानुषपित्र्य सर्वस्मा
र्तकर्मसु सकृत्सहैव पात्राण्युदकसस्थानि आसादयति॥नतुद्वंद्वस

दृ एकैकमिति दैवमानुषपित्र्यभेदेन विदधिरे ॥ तच्चुश्रौतविषयमेव ॥
स्मार्त्ते तु सकृदेव सर्वाणीति एवकारस्सर्वशब्दार्थाविधानात् ॥ सर्वाणि
यथासंभवं वा उदक्संस्थान्यासादयति ॥ द्रव्य आज्यस्थाली प्रणिता
पात्रं प्रोक्षणीपात्रं आज्यं बर्हिः इध्मं उपवेषं संमार्गदर्भान् अवज्व
लनदर्भान् प्रादेशमात्रीः समिधश्चेति साधारणानि ॥ यवसर्षपगो
दधिवटांकुररसादीनि प्रकृतोपयोगीनि चासाद्य ॥ ईशान्यां प्रवरगोत्र
नामोपेतं यजुर्वेदस्य तैत्तिरियकान्तर्गतहिरण्य केशीशाखाध्यायिनम
मुकशर्माणममुककर्मणि ब्रह्माणं त्वामहं वृणे इति वृणुयात् ॥ वृतो २३
स्मीत्युक्त्वा आचम्य उत्तरेण पात्राणि अपरेणाग्निं दक्षिणातिक्रम्य

ब्रह्मसदनात्तृणं निरस्याप उपस्पृश्याग्निमभिमुख उपविशति ॥ ब्रह्मालाभे
कूर्चं यज्ञोपवीतं दंडं कमंडलुं वा स्थापयेत् ॥ द्वौ दर्भौ समौ साग्रौ अंतर्ग
र्भरहितौ प्रादेशापरिमितौ पवित्रे कृत्वा नखवदन्येन छित्वा प्रणितापात्रं त्रिः
प्रक्षाल्य प्रागग्रपवित्रांतर्हितमद्भिः पूरयित्वा पवित्रमुदगग्रं करयोरंगु
ष्ठोपकनिष्ठिकाभ्यां त्रिरुत्पूय दक्षिणोत्तराभ्यां पाणिभ्यां समं प्राणे धृत्वा
अविषिंचन् नीत्वोत्तरेणाग्निं दर्भेषु निधाय दर्भैरपिधाय पवित्रे प्रोक्षणी
पात्रे उदगग्रे न्यस्य त्स्याद्भिरापूर्य पूर्ववत् ॥ त्रिरुत्पूय पात्राण्युत्तानानि कृत्वा इ
ध्मं च विस्रस्य प्राक्संस्थं त्रिः सर्वाभिः प्रोक्षति ॥ ततो दर्वीमग्नौ निष्टप्य संमा
र्गकुशानादाय ॥ द्रव्य प्राचीमग्रैरंतरतोभ्याकारं प्रतीचीं मध्यैर्बाह्यतोमू

लेदंडंसमृज्यपुनर्निष्टप्यबर्हिषिनिधायसमार्गकुशानभ्युक्ष्याग्नावा
धाय॥आज्यंविलाप्यपवित्रांतर्हितायामाज्यस्थाल्यामाज्यंनिरूप्यउ
पविषेणाग्न्यायतनेउत्तरतोंगारान्कृत्वातेष्वाज्यस्थालीमधिश्रित्यद
र्भैरवद्योत्यदर्भाग्रद्वयंसजलंन्यस्यप्रज्वालितेनदर्भेणत्रिःपर्यग्निकृत्वा
उत्तरतउद्वास्यअंगारानपोह्यअपरेणाग्निंबर्हिरास्तीर्यतत्राज्यंनिधा
धायपुनराहारंत्रिरुत्पूयपश्चादारभ्यप्राङूनीतोत्पूयनिमज्यपश्चादा
नीयेत्येवंत्रिःकृत्वापवित्रेप्रोक्ष्याग्नावाधायपरिधिमपरेणाग्निंषट्त्रिंश
दंगुलमुदगग्रंनिधायदक्षिणेनाष्टत्रिंशदंगुलंप्रागग्रंमध्यमस्यमूलेन २४
संस्पृष्टं॥उत्तरेणचतुस्त्रिंशदंगुलंप्रागग्रंमध्यमस्याग्रेणसंस्पृष्टं॥

परिस्तरणोपरिपरिस्तरणस्यपरिदधाति॥इतिपरिधिपरिधानांतंकृत्वायजमानो
भार्यान्वारब्धःसन्परिधिदेशाद्बहिःपरिषिंचति॥अदितेनुमन्यस्व॥दक्षिणतः
प्राक्संस्थं॥अनुमतेनुमन्यस्व॥पश्चादुदक्संस्थं॥सरस्वतेनुमन्यस्व॥उत्तर
तःप्राक्संस्थं॥देवसवितःप्रसुव॥ईशानादिईशान्यंतंसर्वतःप्रदक्षिणंपरिषिं
चति॥दर्व्याज्यमादायेध्ममभिघार्य॥ॐअयंतइध्मआत्माजातवेदस्तेनेध्य
स्ववर्धस्वचेद्धि॥वर्धयचास्मान्प्रजयापशुभिर्ब्रह्मवर्चसेनान्नाद्येनसमेधयस्वा
हा॥हस्तेनेध्मंजुहोति॥जातवेदसेग्नयइदंनमम॥ततोदर्व्याज्यस्थालीस्थमा
ज्यमादाय॥उत्तरंपरिधिसंधिमनुसंलक्ष्यप्राग्दक्षिणापवर्गंसंततमग्न्या
यतनेजुहोतिप्रजापतयेमनवेस्वाहेतिमनसामंत्रमुच्चारयन्॥प्रजाप

हि॰म॰प्र॰ तयेमनवइदं॥ दक्षिणंपरिधिसंधिमभिलक्ष्यप्रागुदगपवर्गंसंततमग्न्या
२५ यतनेइंद्रायस्वाहेतिपठन्जुहोति॥ इंद्रायेदं॰ इत्याघारौहुत्वा॥ ततः अ
ग्नेरुत्तरपूर्वार्धे॥ अग्नयेस्वाहा॥ अग्नयइदं॰ ततः दक्षिणार्द्धे पूर्वार्द्धे॥ सो
मायस्वाहा॥ सोमायेदं॰ इत्याज्यभागौहुत्वा॥ आज्यभागयोर्मध्ये वक्ष्यमाण
आहुतीर्जुहोति॥ अथसामान्यप्रधानहोमः॥ युक्तोवहजातवेदः पुरस्ता
कर्म दग्नेविद्धिक्रियमाणंयथेदं॥ त्वंभिषक्भेषजस्यासिकर्तात्वयागामश्वान्पु
रुषान्सनेमस्वाहा॥ जातवेदसेअग्नयइ॰ यातिरश्चीनिपद्यसेअहंविधर
णीति॥ तांत्वाघृतस्यधारयाग्नेसंराधनींयजेस्वाहा॥ संराधन्या २५
इदं॰ संराधन्यैदेव्यैस्वाहा॥ संराधन्यैदेव्याइदं॥ प्रसाधन्यैदेव्यैस्वाहा॥

प्रसाधन्यैदेव्याइदं॰॥ भूःस्वाहा॥ अग्नयइदं॰॥ भुवस्वाहा॥ वायवइदं॰ सु
वस्वाहा॥ सूर्यायेदं॰ भूर्भुवःस्वस्वाहा॥ प्रजापतयइदं॰ इतिअष्टौआघा
वतीदर्विहोमेसामान्यप्रधानहोमः॥ अथप्रधानहोमः॥ धातादहातुनोर
यिमीशानोजगतस्पतिः॥ सनःपूर्णेनवावनत्स्वाहा॥ धात्रइदं॰ धाताप्रजा
याउतरायईशेधातेदंविश्वंभुवनंजजान॥ धातापुत्रंयजमानायदाताना
स्माउहव्यंघृतवद्विधेमस्वाहा॥ धात्रइदंन॰ धाताददातुनोरयिंप्राचींजी
वातुमक्षितां॥ वयंदेवस्यधीमहिसुमतिं सत्यराधसस्वाहा॥ धात्रइदं॰
धाताददातुदाशुषेवसूनिप्रजाकामायमीढुषेदुरोणे॥ तस्मैदेवाअमृ
ताःसंव्ययंतांविश्वेदेवासोअदितिःसजोषास्वाहा॥ धात्रइदं॰ इतिप्रधा

हिन्म॰प्र॰ नाहुतिचतुष्टयं हुत्वा ॥ अथांगहोमः ॥ इमंमेवरुणश्रुधीहवमद्याचमृडय ॥
२६ त्वामवस्युराचके स्वाहा ॥ वरुणायेदं॰ तत्वायामि ब्रह्मणावंदमानस्तदाशा
स्तेयजमानोहविर्भिः ॥ अहेडमानोवरुणेहबोध्युरुशꣳस मानआयुः प्रमो
षीः स्वाहा ॥ वरुणायेदं॰ त्वंनोअग्नेवरुणस्यविद्वान्देवस्यहेडोवयासिसी
ष्ठाः ॥ यजिष्ठोवन्हितमःशोशुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत्स्वाहा ॥
वरुणायेदं॰ सत्वंनो अग्नेवमोभवोती नेदिष्ठोअस्याउषसोव्युष्टौ ॥ अव
यक्ष्वनोवरुणꣳ रराणोवीहिमृडीकꣳ सुहवोमएधि स्वाहा ॥ वरुणायेदं॰
त्वमग्नेअयास्ययासन्मनसाहितः ॥ अयासन्हव्यमूहिषेयानोधेहिभे २६
षजꣳ स्वाहा ॥ अयसेग्नयइदं॰ प्रजापतेनत्वदेतान्यन्योविश्वाजातानि

परिताबभूव ॥ यत्कामास्तेजुहुमस्तंनोअस्तुवयꣳस्यामपतयोरयीणा
ꣳ स्वाहा ॥ प्रजापतयइदं॰ इतिषट्अंगहोमः ॥ अथजयाद्युपहोमः ॥ चित्तं
चस्वाहा ॥ चित्तायेदं॰ चितिश्चस्वाहा ॥ चित्तयइदं ॥ आकूतंचस्वाहा ॥ आ
कूतायेदं ॥ आकूतिश्चस्वाहा ॥ आकूत्यायेदं॰ विज्ञातंचस्वाहा ॥ विज्ञाताय
इदं॰ विज्ञानंचस्वाहा ॥ विज्ञानायेदं॰ मनश्चस्वाहा ॥ मनसइदं॰ शाक्करीश्चस्वाहा ॥
शाक्करीभ्यइदं॰ दर्शश्चस्वाहा ॥ दर्शायेदं॰ पूर्णमासश्चस्वाहा ॥ पूर्णमासाये
दं॰ बृहच्चस्वाहा ॥ बृहतइदं ॥ रथंतरंचस्वाहा ॥ रथंतरायेदं॰ प्रजापतिर्ज
यानिंद्रायवृष्णेप्रायच्छदुग्रः पृतनाज्येषु तस्मैविशः समनमंतसर्वासउ
ग्रः सहिहव्याबभूवस्वाहा ॥ प्रजापतयइदं॰ इतित्रयोदशजयहोमाः ॥

अथाभ्यातानाः॥ अग्निर्भूतानामधिपतिः समावत्वस्मिन्ब्रह्मन्नस्मिन्क्षत्रे
स्यामाशिष्यस्यांपुरोधायामस्मिन्कर्मन्नस्यांदेवहूत्यांः स्वाहा। अग्नयेभू
तानामधिपतनइदं॥ इंद्रोज्येष्ठानामधिपतिः समा॰ स्वाहा। इंद्रायज्येष्ठा
नामधिपतयइदं॰ यमः पृथिव्याधिपतिः समा॰ स्वाहा। यमायपृथिव्याधि
पतयइदं॰ वायुर्वंतरिक्षस्याधिपतिसमा॰ स्वाहा। वायवेंतरिक्षस्या
धिप॰ सूर्योदिवोधिपतिःसमा॰ सूर्यायदिवोधिप॰ चंद्रमानक्षत्राणामधि
पतिःसमा॰ चंद्रमसेनक्षत्राणामधिपतयइदं॰ बृहस्पतिर्ब्रह्मणोधिपतिः
समा॰ बृहस्पतयेब्रह्मणोधिपतयइदं॰ मित्रःसत्यानामधिपतिःसमा॰
मित्रायसत्यानामधिपतयइदं॰ वरुणोपामधिपतिःसमा॰ वरुणायअ

पामधिपतिनइदं॰ समुद्रःस्रोत्यानामधिपति॰ समुद्रायस्रोत्यानाम॰ अ
न्नंः साम्राज्यानामधिपतितन्माव॰ अन्नायसाम्राज्यानामधिपतिनइ
दं॰ सोमओषधीनामधिपतिः समाव॰ सोमायओषधीनामधिपतयइ॰
सविताप्रसवानामधिपतिःसमा॰ सवित्रेप्रसवानामधिपतयइदं॰ रुद्रः
पशूनामधिपतिःसमा॰ रुद्रायपशूनामधिपतय॰ उदकस्पर्शः॥ त्वष्टारू
पाणामधिपति॰ त्वष्ट्रेरूपाणामधिपतयइदं॰ विष्णुःपर्वताना
मधिपतिःस॰ विष्णवेपर्वतानामधिपतयइदं॰ मरुतोगणानामधिपतिः
समा॰ मरुद्भ्योगणानामधिपतिभ्यइदं॰ प्राचीनावीति॥ पितृनुपतिष्ठते
वा॥ पितरःपितामहाःपरेवरेततास्ततामहाइहमावत॥ अस्मिन्ब्रह्मंन

द्वि॰म॰प्र॰
२८

स्मिन्क्षत्रे स्यामाशिष्यस्यां पुरोधायामस्मिन्कर्मन्नस्यां देवहूत्यामिति
प्राचीनावीतिर्जुहोतिवा॥ देवहूत्याः स्वाहा। पितृभ्यः पितामहेभ्यः परेभ्यो
वरेभ्य इदं॰ यज्ञोपवीतीत्युदकस्पर्शः॥ अग्निरिंद्रो यमोवायुः सूर्यश्च
द्रोबृहस्पती॥ मित्रोवरुणाः समुद्रो नसोमः सविता रुद्रो॥ त्वष्टाविष्णुश्च
मरुतः पितरोभ्यातान संज्ञकाः॥ इत्यष्टादशो तेभ्यातानहोमः॥
अथराष्ट्रभृतः॥ अत्रत्रिविधोपि राष्ट्रभृतानां मंत्राणां विभागेदशापर्यायः॥
सप्तमोत्तमाएकाहुतिकाविति द्वाविंशति मंत्राः॥ पक्षत्रयेपि समानत्यागः॥
सर्वमंत्रमुच्चार्य तस्मैस्वाहेत्युक्त्वापूर्वाहुतिः॥ पुनः सर्वमंत्रमुच्चार्यता २८
भ्यः स्वाहेत्युक्त्वाद्वितीयाहुतिः॥ इत्येकः पक्षः सर्वमंत्रमुच्चार्य तस्मैस्वाहे

त्युक्त्वापूर्वाहुतिः॥ केवलांताभ्यः स्वाहेत्युक्त्वाजुहोतीति द्वितीयः॥ अथतृ
तीयः॥ ऋताषाड्ऋतधामाग्निर्गंधर्वः स इदं ब्रह्मक्षत्रं पातु तस्मैस्वाहा॥
ऋतसाहऋतसाम्नेग्नयेगंधर्वायेदं॥ तस्यौषधयोप्सरसऊर्जोनामता
इदं ब्रह्मक्षत्रं पातु ताभ्यः स्वाहा॥ ओषधीभ्योप्सरोभ्य ऊर्ग्भ्य इदं॰ संहि
तोविश्वसामासूर्योगंधर्वः स इदं ब्रह्मक्षत्रं पातु तस्मैस्वाहा॰ संहिताय
विश्वसाम्नेसूर्यायगंधर्वायेदं॰ तस्यमरीचयोप्सरस आयुवोनामताइ
दं ब्रह्म॰ ताभ्यः स्वाहा॥ मरीचिभ्योप्सरोभ्य आयुभ्य इदं॰ सुषुम्नः सूर्यर
श्मिश्चंद्रमागंधर्वः स इदं ब्रह्मक्षत्रं पातु तस्मैस्वाहा॥ सुषुम्नायसूर्य
रश्मयेचंद्रमसेगंधर्वायेदं॰ तस्यनक्षत्राण्यप्सरसोबेकुरयोनामताइ

दंब्रह्मक्षत्रंपातुतस्मैस्वाहा॥ नक्षत्रेभ्योप्सरोभ्योबेकुरिभ्यइदं॰ भुज्युःसु
पर्णोयज्ञोगंधर्वः सइदंब्रह्म॰ तस्मैस्वाहा॥ भुज्यवेसुपर्णाययज्ञायगं
धर्वायेदं॰ तस्यदक्षिणाअप्सरसस्तवानामताइदंब्र॰ ताभ्यःस्वाहा॥ दक्षि
णाभ्योप्सरोभ्यस्तवाभ्यइदं॰ अ ४ प्रजापतिर्विश्वकर्मामनोगंधर्वसइ
दंब्र॰ तस्मैस्वाहा॥ प्रजापतयेविश्वकर्मणेमनसेगंधर्वायेदं॰ तस्यऋ
तस्यऋक्सामान्यप्सरसोवन्हयोनामताइदं॰ ताभ्यस्वाहा॥ ऋक्सामे
भ्योप्सरोभ्योवन्हिभ्यइदं॰ इषिरोविश्वव्यचावातोगंधर्वःसइदं॰ तस्मै
स्वाहा॥ इषिरायविश्वव्यचसेवातायगंधर्वायेदं॰ तस्यापोप्सरसोमुदा
नामताइदंब्रह्म॰ ताभ्यःस्वाहा। अद्भ्योप्सरोभ्योमुदाभ्यइदं॰ भुवनस्य

पतेयस्यतउपरिगृहाइहच॥ सनोरास्वाज्यानिं॰ रायस्पोषं॰ सुवीर्यं॰ संव
त्सरीणां॰ स्वस्तिं॰ स्वाहा॥ भुवनस्यपत्यइदं॥ परमेष्ठ्यधिपतिर्मृत्युर्गंधर्वःस
इदंब्रह्म॰ तस्मैस्वाहा। परमेष्ठिनेधिपतयेमृत्यवेगंधर्वायेदं॥ तस्यविश्व
मप्सरसोभुवोनामताइदंब्रह्म॰ ताभ्यःस्वाहा। विश्वस्माअप्सरोभ्योभूभ्यइ
दं॥ सुक्षितिःसुभूतिर्भद्रकृत्सुवर्वान्पर्जन्योगंधर्वसइदं॰ तस्मैस्वाहा। सु
क्षितयेसुभूतयेभद्रकृतेसुवर्वतेपर्जन्यायगंधर्वायेदं॰ तस्यविद्युतोप्सर
सोरुचोनामताइदं॰ ताभ्यःस्वाहा॥ विद्युद्भ्योप्सरोभ्योरुग्भ्यइदं॥ दूरेहेति
रमृडयोमृत्युर्गंधर्वःसइदंब्रह्म॰ तस्मैस्वाहा॥ दूरेहेतयेऽमृडयायमृत्यवे
गंधर्वायेदं॥ तस्यप्रजाअप्सरसोभीरुवोनामताइदंब्रह्म॰ ताभ्यःस्वाहा॥

हि॰मन्त्र प्रजाभ्योप्सरोभ्योभीरुभ्यइदं॰चारुःकृपणकाशीकामोगंधर्वःसइदं॰तस्मैस्वा
३० हा।चारवेकृपणकाशिनेकामायगंधर्वायेदं॰तस्याधयोप्सरसःशोचयंती
नामताइदब्रं॰ताभ्यःस्वाहा॥आधिभ्योप्सरोभ्यःशोचयंतीभ्यइदं॰सनोभुव
नस्यपतेयस्यतउपरिगृहाइहच॥उरुब्रह्मणेस्मैक्षत्रायमहिशर्मयच्छ
स्वाहा॥भुवनस्यपत्यइदं॰॥ऋताषाट्सं॰हितःसुषुम्नोभुज्युःप्रजापति
रिषिरोभुवनस्यपते।परमेष्ठीसुक्षितिईरेहेतिश्चारुःसनोभुवनस्यप
तेतिदशभिःपर्यायैःसहद्वाविंशतीराष्ट्रभृतःइत्युपहोमाः॥ ॥यदस्य ३०
स्यकर्मणोत्यरीरिचंयद्वान्यूनमिहाकरं।अग्निष्टत्स्विष्टकृद्विद्वान्सर्वं॰स्वि
ष्टं॰सुहुतंकरोतुमे।अग्नयेस्विष्टकृतेसुहुतहुतेसर्वहुतआहुतीनां

कामानां॰समर्द्धयित्रेस्वाहा॥अग्नेरुत्तरार्धस्यपूर्वार्द्धेतिहायजुहोति॥
अग्नयेस्विष्टकृतइदं॰॥ततःइध्मसंनहनंतूष्णीमग्नौप्रास्यदर्व्यापरिधीन
नक्ति॥मध्यमंदक्षिणमुत्तरंच॥ततोयथाहतंहुसवोगोर्यमितिपरिसमू
ह्यपूर्ववत्॥ततःबर्हिभ्यःपरिस्तरणेभ्यश्चैकोनिचतृणान्याहायदर्व्यामग्रा
ण्यनक्ति॥मध्यमंमूलंचाज्यस्थाल्यांएवंद्वितीयेपि॥तृतीयेतु॥मूलानिम
ध्यमंचाज्यस्थाल्यांदर्व्यामग्राणिततःश्चैकंतृणमवस्थाप्य॥उत्तरपरिधि
संधिमनुप्रहृत्यत्रिरंजलिनोर्ध्वंसंयोति॥ततआत्तंतृणंप्रहृत्यअंगु
ल्यात्रिर्निर्दिश्य॥प्राणंत्वस्कःपृथिवीचापउपस्पृश्यपरिधिंमध्यममग्नौ
प्रहृत्यसहेत्तरोप्रहरतिमध्यमंमध्येकरोति॥अथप्रायश्चित्तहोमाः॥

कृतस्यकर्मणोन्यूनातिरिक्तदोषपरिहारार्थंप्रायश्चित्तहोमंकरिष्ये॥इ
तिसंकल्प्यजुहुयात्॥ओं अनाज्ञातंयदाज्ञातंयज्ञस्यक्रियतेमधु॥
अग्नेतदस्यकल्पयत्वंहिवेत्थयथातथं॰स्वाहा॥अग्नयइदं॰॥पु
रुषसंमितोयज्ञोयज्ञःपुरुषसंमितः॥अग्नेतदस्यकल्पय॰थं॰स्वाहा।
अग्नयइदं॥यत्पाकत्रामनसादीनदक्षानयज्ञस्यमन्वतेमर्तासः॥अग्नि
ष्टद्धोताक्रतुविद्विजानन्यजिष्ठोदेवां॰ऋतुशोयजातिस्वाहा॥अग्नयइदं।
त्वन्नोअग्नेवरुणस्यवि॰स्मत्स्वाहा॥अग्नीवरुणाभ्यामिदं॥सत्वंनोअ
ग्नेवमोभवोतीनेदि॰एधिस्वाहा॥अग्नीवरुणाभ्यामिदं॥यतइंद्रभया ३१
महेततोनोअभयंकृधि॥मघवंछग्धितवतन्नऊतयेविद्विषोविमृधो

जहिस्वाहा॥इंद्रायेदं॰स्वस्तिदाविशस्पतिर्वृत्रहाविमृधोवशी॥वृषेंद्रःपुर
एतुनःस्वस्तिदाअभयंकरःस्वाहा॥इंद्रायेदं॰त्र्यंबकंयजामहेसुगंधिं
पुष्टिवर्धनं॥उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात्स्वाहा॥त्र्यंब
कायेदं॰इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं॥समूढमस्यपांसुरेस्वाहा।
विष्णवइदं॰भूःस्वाहा।अग्नयइदं॰भुवःस्वाहा।वायवइदं॰स्वःस्वाहा।सू
र्यायेदं॰महःस्वाहा।बृहस्पतयइदं॰जनःस्वाहा।वरुणायेदं॰तपःस्वाहा।
इंद्रायेदं॰सत्यं॰स्वाहा॥विश्वेभ्योदेवेभ्यइदं॰वसुभ्योरुद्रेभ्यआदित्येभ्यः
स्वाहा।वसुभ्योरुद्रेभ्यआदित्येभ्यःसं॰स्त्रावभागेभ्यइदं॰ततःउत्तर
परिषेकः॥अदितेन्वमं॰स्थाः॥अनुमतेन्वमं॰स्थाः।सरस्वतेन्वमं॰

हि॰म॰प्र॰ ३२

स्था:॥ देवसवितः प्रासावीरिति पूर्ववत्परिषेकं कृत्वा॥ यथेतं प्रणीताः पर्याहृ
त्यापरेणाग्निं निधाय जागारभ्यादिकं चतुष्टयेऽर्ध्वमथ श्रुवं जलमासिच्य
भूमौ निनीयात्मानं मार्जयित्वा मुखं च संमृज्य यथाश्रद्धं ब्रह्मणे दक्षिणां
दत्वा॥ इदं ब्रह्मणे पूर्णपात्रं तत्प्रातिनिधिभूतं यथाशक्ति हिरण्यं वा ब्रह्म
णे संप्रददे। इत्युक्त्वा न ममेति वदेत्॥ ब्रह्मा स्वस्तीत्युक्त्वा यथेतं प्रातिनिष्क्रा
मति॥ ततः संस्थाजपेनोपतिष्ठते॥ यज्ञ नमस्ते यज्ञ नमो नमश्च ते यज्ञ शि
वेन मे संतिष्ठस्व स्योनेन मे संतिष्ठस्व सुभूतेन मे संतिष्ठ ब्रह्मवर्चसेन मे संति
ष्ठस्व यज्ञस्यर्द्धिमनु संतिष्ठस्वोप ते यज्ञ नम उप ते नम उप ते नमः॥ इद ३२
मिध्मसंनहनादिकं आघारवती दर्विहोमे गृह्यांतरे दृष्टत्वेन वृत्तिकृदु

क्तेः शिष्टपरिगृहीतत्वात्कर्तव्यं॥ यावदुक्तमेव स्वगृह्योक्तं कर्तव्यमिति वद
न्तः केचिन्नेच्छंति॥ केचित्त्रिवृदन्नहोमानंतरमेव कुर्वंति॥ यथा पूर्विकपक्षे
णात्रिवृदन्नहोमः॥ यत्र होमो ब्राह्मणभोजनं चोक्तं तत्र त्रिवृदन्नहोमः॥ ॥
गृह्यांतरोक्तकर्णवेधतडागोत्सर्गादौ ब्राह्मणभोजनवति अतिप्रसंगवारणा
य चोक्तं॥ यत्राचारोप्यस्ति तत्रैव त्रिवृदन्नहोमः॥ वृत्तिकृत् आचाराभावादभाव
स्यादिति मात्तृदत्तः॥ अतस्तत्राचाराभावान्नास्त्यतिप्रसंगः॥ उत्सर्जने तु होमो
ब्राह्मणभोजनं चोक्तमस्ति॥ अनादिशिष्टपरंपरया त्रिवृदन्नहोमानुष्ठानं तत्र
श्च दृश्यते॥ अतो भवत्युत्सर्जने त्रिवृदन्नहोमः॥ एतेन उत्सर्जने त्रिवृदन्नहोमो
नास्तीति नास्तिको वदन्निरस्तः॥ वक्ष्यते चोत्सर्जनप्रयोगे विशेषः॥ नात्र

हि॰म॰प्र॰
३३

वदानधर्मः॥आहुतिपरिमाणश्चैधर्मोप्भवति॥यावदुच्चैः र्वचःक्रियाभवति॥त्रि
वृदन्नहोमस्यापूर्विकित्वात्॥ब्राह्मणभोजनार्थंनिष्पन्नादन्नाद्धोमः॥होम
त्रोषादिनासंतुष्टान्पुण्याहंवाचयेत्॥ओदनात्पूपसक्तूनाज्यभिघारितमे
कीकृतानांदर्व्यासकृदवदायहोमः॥अत्रसूत्रेओदनस्यापूपानांसक्तूनामि
ति पृथङ्निर्देशः स्वरूपज्ञानार्थः॥सूत्रांतरेषुत्रिवृच्छब्देननिर्दिष्टो लाप
वार्थः॥अंतेउत्सर्जनसूत्रेअपूपैःसक्तुभिरोदनेनेतिव्युत्क्रमेणानिर्देशः स्वव
देयक्रमबाधार्थः॥तेनद्रव्यत्रयंकथमप्येकीकृत्यहोतव्यं॥अन्यथाओदना
दिपाठक्रमेणादायहोतव्यमितिस्यात्तन्नेष्टमितिव्युत्क्रमेणसूचितमाचार्ये ३३
णेतिप्रयोगः॥अमुकर्कर्मांगंत्रिवृदन्नहोमंपुण्याहवाचनंचकरिष्येइतिसंक

ल्प्यपरिसमूह्यपरिस्तीर्यउत्तरेणाग्निंकुशानास्तीर्यतत्रपात्राणिसादयति।
प्रोक्षणीपवित्रे॰दर्वी॰घृतं॰त्रिवृदन्नं॰उद्धरणपात्रं॰अष्टसमित्कमिध्मं॰कु
शांश्चासाद्यप्रोक्षणीःसंस्कृत्यपात्राणिप्रोक्ष्यदर्वीनिष्टप्यापरेणाग्निंनि
धायओदनपूपसक्तुवद्इतित्रिवृदन्नंबर्हिनिष्पन्नत्वादग्नावधिश्रित्योदगु
द्वास्यावोक्ष्योभिघार्येत्युद्वास्यति॥एवंसर्वत्रायतनात्बहिर्निष्पन्नेनान्ने
नदेवपवित्रारव्यसंस्कारंकृत्वाअग्नेःपश्चान्निधायपरिषिच्यतूष्णीमष्टस
मित्कमिध्ममग्नावाधायत्रिवृदन्नमेकीकृत्यसर्पिर्मिश्रंश्चदर्व्यासकृत्सकृ
दवदायजुहोति॥अग्नयेस्वाहा॥अग्नयइदं॰॥सोमायस्वाहा॥सोमायेदं॰॥
अग्नयेन्नादायस्वाहा॥अग्नयेन्नादायेदं॰॥अग्नयेन्नपतयेस्वाहा॥अ

ग्नयेऽन्नपतय इदं॰ प्रजापतये स्वाहा। प्रजापतय इदं॰ विश्वेभ्यो देवेभ्यः स्वा
हा। विश्वेभ्यो देवेभ्य इदं॰ सर्वाभ्यो देवताभ्यः स्वाहा। सर्वाभ्यो देवताभ्य इदं॰
अग्नये स्विष्टकृते स्वाहा। अग्नये स्विष्टकृत इदं। इत्यष्टौ चाहुतीर्हुत्वा॥ य
ततोऽग्नेरुत्तरतः॥ प्रागग्रान् कुशान् आस्तीर्य तूष्णीमुदकमासिच्य हुतशे
षं त्रिरन्नं किंचिद्धस्तेनादाय बलिं करोति॥ वास्तुपतये स्वाहा। वास्तु
पतय इदं॥ तूष्णीं सकृदेतत्परिषेकः॥ ततो न्यूनातिरिक्तदोषपरिहारार्थं
समस्तव्याहृति होमं करिष्य इति संकल्प्य॥ भूर्भुवः सुवः स्वाहा। प्रजाप ३४
तय इदं॥ ततः अदितेऽन्वमंस्था इत्याद्युत्तरपरिषेकादि कृत्वा त्रिवृद
न्नदोषात् ब्राह्मणान्संतोष्य तान्पुण्याहं वाचयेत्॥ यत्पुण्यं नक्षत्रे

मित्यादि मह्यममुककर्मकारिणे पुण्याहं भवंतो ब्रुवंतु॥ इति त्रिर्यजमा
नः॥ ॐ पुण्याहमिति त्रिर्विप्राः॥ स्वस्ति न इत्यादि मह्यममुककर्मकारि
णे स्वस्तिं भवंतो ब्रुवंत्विति त्रिः॥ ओं स्वस्तीति प्रतिवचनं त्रिः॥ ऋध्या
स्म हव्यैरित्यादि॰ ऋद्धिं भवंतो ब्रुवंत्विति त्रिः॥ ओं ऋद्धिरिति प्रतिवचनं
त्रिः॥ यस्मिन्ब्रह्माभ्यजयदित्यादि मह्यमित्यादि पूर्ववत्॥ ॐ श्रीरस्त्वि
ति त्रिः॥ अस्तु श्रीरिति प्रतिवचनं त्रिः॥ शिवं कर्मास्तु गोत्राभिवृद्धिरस्तु॥
प्रजापतिः प्रीयतामिति॥ इति त्रिवृदन्नहोमप्रयोगः॥ ततः कर्ताऽपरे
णाग्निं उपरिबद्धशुभवर्तुलवितानस्याधो दर्भे भार्यां प्राङ्मुखीमुपवे
श्य तस्या दक्षिणहस्ते यवं निदधाति॥ वृषासीति सकृदुक्ते न मंत्रेण य

वस्य दक्षिणतः उत्तरतश्च व्रीहीन्सर्षपं निदधाति ॥ आयुरसि इति ॥ तदुपरि गव्यं
दधि निदधाति ॥ श्वावृत्तरिति ॥ ततस्तूष्णीं प्राशयति ॥ कृतेशुद्धाचमनोयास्त
स्या उदरं हस्ताभ्यामभिमृशति ॥ अभिष्टाहं दशभिरभिमृशामि दशमास्या
यसूतवाइति ॥ अत्रन्यूनांगुलेस्तु कर्तुर्दशाभिरिति पदं लुप्यते ॥ स्मार्ता
ग्न्युपस्थाने गार्हपत्यपदलोपवत् ॥ ततो वटांकुरं प्रपीड्य रसं निष्काश्य
घृतेन संमिश्रं कृत्वा ॥ कृतास्थोरुमूलोपधानायास्तस्या दक्षिणे नासा
पुटे तूष्णीं सेचयेत् ॥ ततो विभूतिं धृत्वा कृतस्य कर्मणः सांगतासिध्य
र्थं दशाधिकान्ब्राह्मणान्यथाकालं यथोपपन्नेनान्नेन भोजयिष्ये इति
संकल्प्य ॥ पुनः कर्मणः सांगतासिध्यर्थं गंधताम्बूलादि ब्राह्मण पूज ३५

नं भूयसीं दक्षिणां च दातुमहमुत्सृजे इति संकल्प्य गंधादिना संपूज्य दक्षि
णां दद्यात् ॥ ततः आशिषो गृहीत्वा ॥ अग्नेतेजस्विनित्यादिमंत्रैः ॥ ततः ब्रा
ह्मणान्नत्वा । प्रमादात्कुर्वतां कर्मेतिकर्मसाद्गुण्याय विष्णुं स्मरेत् ॥ ततो ब्रा
ह्मणेभ्यो मंत्रोक्ता आशिषो ग्राह्याः ॥ आशिषमेवेतामाशास्त इत्याद्या
ततो ब्राह्मणान्नमस्कृत्य शिष्टैरिष्टैश्च भोजनं कुर्यात् ॥ ॥ इति श्रीस
त्याषाढहिरण्यकेशीस्मार्तप्रयोगरत्ने प्रथमसंस्कारप्रकरणे वेदोपा
यनमहेशभट्टकृतो पुंसवनप्रयोगः ॥ ॥ अथ गर्भस्रावे स्तंभनवि
धिः ॥ आर्द्रेण पाणिना मंत्रावृत्त्या नाभेरूर्ध्वं त्रिरुन्मार्ष्टि ॥ परां चत्वावां
चं त्वष्टा बध्नातु ॥ बंधने सक्र तन्तुपवत्स्य दशमासो अवीरहेति ॥ ॥

हि॰म॰प्र॰
२६

अथसीमंतोनयनप्रयोगः॥ चतुर्थेषष्ठेष्टमेनवमेवामासिशुक्लपक्षेरवि
गुरुशुक्रवारेषुपुनर्वसूपुष्याभिजिद्धस्तप्रोष्ठपदानूराधाश्विनीमूलश्रवण
रेवतीरोहिणीमृगसंज्ञकपुंनक्षत्रेषुमध्यपादद्वयेषष्ठ्यष्टमीद्वादशीचतुर्द
श्यमावास्याव्यतिरिक्तशुभलग्नादौकार्यं॥ ॥यजमानःकृतावश्यककृ
यःवस्त्राच्छादितपीठेप्राङ्मुखउपविश्यस्वदक्षिणतःपत्नीमुपवेश्याचम्य
प्राणानायम्यदेशकालौ संकीर्त्यममास्यांभार्यायांविद्यमानगर्भस्य
बैजिकगार्भिकदोषपरिहारद्वाराक्षेत्रसंस्कारद्वाराचश्रीपरमेश्वरप्री
त्यर्थंसीमंतोनयनाख्यंकर्मकरिष्ये॥ तदंगंगणपतिपूजनंपुण्याह २६
वाचनंमातृकापूजनंनांदीश्राद्धंचकरिष्येइतिसंकल्प्य॥ उक्तरीत्या

कुर्यात्॥ ततःसीमंतोंनयनांगत्वेनउद्धननादिकर्मकरिष्येइतिसंकल्प्य॥उ
द्धननादिभूसंस्कारंविधाय॥ तत्रमंगलनामानमौपासनमग्निंप्रतिष्ठाप्य
आयतनेतुपरिसमूहनादि विधायसमिन्त्रयमाहायश्चक्षुएहीत्यादिसा
मान्यप्रधानांतमुक्त्वाप्रधानहोमेधातारंचतुराज्येन॰॥ अंगहोमेवरुणं
द्विरित्यादिसामान्यप्रधानांतंचहुत्वाततः॥धातादहातुनोरयिमित्यादि
प्रधानाहुतिचतुष्टयंहुत्वासंस्थाजपांतंसर्वंसमाप्यात्रिचदन्नहोमंबली
करणांतंकृत्वापुण्याहवाचनंकुर्यात्॥ ततस्तामपरेणाग्निंपूर्ववत्॥ मंड
लवितानस्याधःप्राङ्मुखीमुपवेश्यत्रेण्याशलल्याउदुंबरस्तबकमुप
संगृह्यतस्याःपुरस्तात्प्रत्यङ्मुखस्तिष्ठन्सीमंतमुन्नयेत्॥ ॐभूर्भुवः

हि॰म॰प्र॰ ३७

[illegible]वः स्वाहा ॥ राकामहꣳ सुहवाꣳ सुष्टुती हुवे शृणोतु नः सुभगा बोधतु त्म
ना ॥ सीव्यत्वपः सूच्या छिद्यमानया ददातु वीरꣳ शतदायमुक्थ्यं ॥ यास्ते
राके सुमतयः सुपेशसो याभिर्ददासि दाशुषे वसूनि ॥ ताभिर्नो अद्य सुम
ना उपागहि सहस्रपोषꣳ सुभगे रराणा ॥ इति द्वाभ्यां सीमंतमभिमंत्रय
ते ॥ सोम एव नो राजेत्याहुर्ब्राह्मणीः प्रजाः विवृत्तचक्रा आसीनास्तीरेतु
भ्यं गंगे ॥ विश्वा उत त्वया वयं धारा उदन्या इव ॥ अतिगाहेमहि द्विषः इति
अत्र मंत्रस्थं गंगापदं त्यक्त्वा यस्याः नद्याः समीपे निवासस्तं नाम संबुध्यं
तं क्षिपेत् ॥ ततो ब्राह्मणभोजनं भूयसीं दक्षिणां संकल्प्य दद्यात् ॥ तत ३७
आशिषो वाचयित्वा ॥ प्रमादात्कुर्वतामिति कर्मसाद्गुण्याय विष्णुं स्मरेत् ॥

इति सीमंतोन्नयनं ॥ ॥ अथ पुंसवनसीमंतोन्नयनयोस्तंत्रप्रयोगः ॥ देशका
लौ संकीर्त्य ॥ ममास्यां भार्यायां विद्यमानगर्भस्य बीजगर्भसमुद्भवैनोनिब
र्हणद्वारा क्षेत्रसंस्कारद्वारा च श्रीपरमेश्वरप्रीत्यर्थं पुंसवनसीमंतोन्नयने
तंत्रेण करिष्ये इति संकल्पः ॥ पुंसवनसीमंतयोरित्यन्वाधानं ॥ गणेशपूज
नादि त्रिवृदन्नहोमं पुण्याहवाचनांतं सर्वं सकृदेव कुर्यात् ॥ संप्रतिपन्न दे
वतैकत्वात् ॥ वैशेषिकधात्री चतुष्टयस्यापि नावृत्तिः ॥ भार्यां
च तुल्यवितानस्याधो दक्षिणतो उपवेश्य दधि द्रप्स प्राशनं सीमंतोन्नयनादि कं
च पृथक्पृथक् कुर्यात् ॥ इति श्री सत्याषाढहिरण्यकेशीस्मार्तप्रयोगर
त्ने वैशंपायनमहेशभट्टकृतो सीमंतोन्नयनप्रयोगः ॥ ॥ अथ क्षिप्रप्रस

विधिः॥ ॥सूतिकायाः शिरःसमीपे उदकुंभंनिदधाति॥ पादयोःसमीपेप
तत्सूर्यंतीं निधाय तूष्णीमुदरं स्पृष्ट्वा आर्द्रेणपाणिना नाभेरधः स्त्रिरवा
डूःवमार्ष्टि॥ यथैववायुःपवते यथासमुद्र एजति॥ एवंतेगर्भ एजतु सह
जरायुणावसर्पत्विति॥ ॥अथजातकर्मप्रयोगः॥ ॥जात
मात्रेपुत्रे पितायस्यमुखंनिरीक्ष्य नद्यादौस्नात्वा असंभवेशीताभिरद्भिः
स्कवर्णयुताभिः युताभिः गृहेस्नात्वासितचंदनमाल्यादिभिरलंकृतः॥
नालछेदनात्प्राक्॥ अश्मानंपरशुंस्कवर्णंसर्षपान्कणांश्च उष्णशी
ताआपः आज्यंउदकुंभंचसंभृत्य प्राङ्मुख उपविश्याचम्यप्राणानाय
म्यदेशकालौसंकीर्त्य ममास्यकुमारस्यबीजगर्भसमुद्भवैनोनिबर्हण

द्वारायुर्वर्चोभिवृद्धिद्वाराचश्रीपरमेश्वरप्रीत्यर्थंजातकर्माख्यंकर्मक
रिष्येइतिसंकल्प्य॥ तदंगंगणपतिपूजनंपुण्याहवाचनंमातृकापूज
नंनांदीश्राद्धंचकरिष्येइतिसंकल्प्य॥ उक्तरीत्याकुर्यात्॥ ततोऽश्मानिप
रशुंतदुपरिहिरण्यंनिधायतानिव्यस्तानिकृत्वा॥ तदुपरिकुमारंसम्यक्
प्रक्षालितहस्ताभ्यांधारयतिप्राक्शिरसं॥ अश्माभवपरशुर्भवहिरण्य
मस्तृतंभव॥ वेदोवैपुत्रनामासिजीवत्वंशरदःशतं॥ अंगादंगात्संभव
हृदयादधिजायसे॥ आत्मावैपुत्रनामासिसजीवशरदःशतमिति॥ य
दिअस्यांकश्चित्जरायुस्तिष्ठतितदाअंजलिनोदकमादायमूर्धानमस्या
वसिंचेत्तिलदेवपद्यस्वनमांसमसिनोदलमवपद्यस्वपथास्यादितिनैमि

त्तिकामिदं॥ततऔपासनाग्निं सूतिकागाराद्बहिः शुचौदेशेसंस्थाप्यतत्र
एकंकपालंसंनप्तंकृत्वातस्मिन्शुष्कंगोमयंप्रक्षिप्यप्रज्वाल्यएषउत्तप
नीयः॥पचनाग्निर्वा॥तमुत्तपनीयमग्निंसूतिकागारेस्थाप्यप्राङ्मुख
उपवेश्यात्वम्यदेशकालौसंकीर्त्य॥अस्यकुमारस्यशंडामर्कादि रक्षो
गणेभ्यः संरक्षणार्थंसर्षपमिश्रैः कणैः सायंप्रातरुद्धूपनंभूम्यालंभनंच
करिष्यइतिसंकल्प्यपर्युक्ष्यपरिसमूह्यतूष्णींपरिषिच्यहस्तेनजुहुया
त्॥नात्रत्यागः॥सायमेवोपक्रम्यसायंप्रातर्दशाहंउद्धूपनंभूम्यालंभने
चबालरक्षार्थंकर्तव्ये॥सायंसायंवा॥यदात्तुपन्नाग्नौ धूद्धूपनंतदात
त्कालमेवोभेसहदेवकर्तव्येइतिवृत्तिकृत्॥ ॥शंडामर्कउप वीरःशं ३९

डीकेरउलूखलः॥च्यवनोनश्यतादितःस्वाहा॥आलिखन्विलिखन्न
निमिषन्किंवदंतउपश्रुतिः स्वाहा॥अर्यम्णः कुंभीशत्रुःपात्रपाणिर्नि
पुणिस्वाहा॥आंत्रीमुखः सर्षपा रुणोनश्यतादितःस्वाहा॥केशिनी
श्वलोमिनीबजाबोजोपकाशिनी॥अपेतनश्यतादितःस्वाहा॥कौबे
रकाविश्ववासोरक्षोराजेनप्रेषितः॥ग्रामान्सजातयोयंतीप्सतःपरिजा
तकृतान्स्वाहा॥एतान्हवैतान्बध्नीतेत्ययंब्रह्मणोदूतस्तानग्निःपर्य
सरत्॥तानिंद्रस्तान्बृहस्पतिः स्तानहंवेदब्राह्मणः प्रमृशतः कूटदं
तान्विकेशानल्लंबस्तनान्स्वाहा॥नक्तंचारिणउरस्पेशाञ्शूलहस्ता
न्कपालपान्स्वाहा॥पूर्वएषांपितेत्युच्चैश्राव्यकर्णकः॥मातोजघन्याग

हि॰मन्त्र
४०

छंतीग्रामेविखुरमिछंतीस्वाहा॥ नक्तंचारिणीस्वसासंधिनीप्रेक्ष्यतेकु
लं॥ यास्वपत्सुजागर्त्तियस्यैविजायांमनस्वाहा॥ तासांत्वंकृष्णवर्त्म
नेक्रामानःहृदययक्तृत्॥ अग्नेयक्षिणीनिर्दहस्वाहेतिएकादशा
भिर्मंत्रैर्निर्धूमेष्वंगारेषुसर्षपमिश्रकणान्होमोवापेनकुमारमु
द्धूपयेत्॥ ततःपाणीप्रक्षाल्यभूमिमालभते॥ यत्तेसुसीमेहृदयंदि
विचंद्रमसिश्रितं॥ तस्यामृतत्वस्यनोधेहिमाहंपौत्रमघंरुदं॥ वेद
तेभूमिहृदयंदिविचंद्रमसिश्रितं॥ तथामृतत्वस्येशानोमाहंपौत्रमघं ४०
रुदमिति॥ ॥अथमेधाजननं॥ ॥ततःदेशकालौसंकीर्त्यअस्य
कुमारस्यधियोधारणाद्यभिवृध्यर्थंमेधाजननंकरिष्येइतिसंकल्प्य॥

॥दर्भेणहिरण्यंबध्वातदंतर्धायप्राक्‌शिरसंकुमारंसंस्थाप्यप्रतिमंत्रंगो
घृतंप्राशयेत्॥ प्राशनस्तुत्रेसमुच्चयद्योतकपदाभावात्॥ भूर्ऋचस्त्वयि
जुहोमिस्वाहा॥ भुवोयजूंषित्वयिजुहोमि॰ स्वःसामानित्वयिजुहो॰
भूर्भुवःस्वरथर्वांगिरसस्त्वयिजुहोमिस्वाहेति नात्रत्यागः॥ ॥इतिमे
धाजननं॥ ततःकुमारमुष्णाशीताभिरद्भिःस्नापयति॥ क्षेत्रियेत्वानिर्ऋ सै
त्यादुहोमुंचामिवरुणस्यपाशात्॥ अनागसंब्रह्मणेत्वाकरोमिशिवेते
द्यावापृथिवीउभेइमे॥ शंतेअग्निःसहाद्भिरस्तु॥ शंद्यावापृथिवीसहो
षधीभिः॥ शमंतरिक्षंसहवातेनतेशंतेचतस्रःप्रदिशोभवंतु॥ सूर्य
मृतंतमसोग्राह्यायदेवाश्रमुंचंनसरजन्येनसः॥ एवमहमिमंक्षेत्रिया

ज्जामित्राꣳ सा [ ] दु होमुंचामि वरुणस्य पाशादिति॥ ॥ततः कुमारं मातुरु
त्संगे आदधाति॥ या दैवीश्चतस्रः प्रदिशो वातपत्नीरभिसूर्यो विचष्टे॥ ता
सां त्वा जरस आदधामि प्रयक्ष्म एतु निरृतिं पराचैरिति॥ ततः कुमारमभि
मंत्रयते॥ मा ते पुत्रꣳ रक्षो हिꣳसीन्मा धेनुरतिसारिणी॥ प्रियाधनस्य भूया
एधमाना स्वे वशा इति॥ अयं कुमारो जरां धयतु सर्वमायुरेतु॥ तस्मै स्त
नं प्रप्यायस्वायुः कीर्तिर्वर्चो यशो बलमिति॥ मंत्रावृत्त्या तूष्णीं प्रक्षालितं
दक्षिणं स्तनं सव्यं च प्रापयति॥ मंत्रावृत्त्या उभौ स्तनावभिमृशति नामय
ति न रुदतियत्र वयं वदामो यत्र चाभिमृशामसीति॥ ततोऽस्याः शिरः स ४१
मीपे उदकपूर्णं पिहितमुखं कुंभं निदधाति॥ आपो गृहेषु जाग्रत य

देवेषु

था गृहेषु जाग्रथ॥ एवमस्मै सुपुत्राय जाग्रतेति॥ ततो जन्मलग्ने दुष्टस्था
नस्थितग्रहजनितपीडानिरासार्थं दानजपादि कारयेत्॥ ततो ब्राह्म
णेभ्यो गोभूहिरण्यादि यथाशक्ति दत्त्वा गंधादिना संपूज्य भूयसीं दक्षि
णां दत्त्वाशिषो वाचयेत्॥ अग्ने तेजस्विन्नित्यादिमंत्रैः। ततो नालच्छेदनादि
यथाचारं कार्यं॥ इदं च रात्रौ संध्यायां ग्रहणे जननमरणाशौचमध्ये
आशौचांते वा पितर्यसंनिहिते पितृव्यादिर्जातकर्म कुर्यात्॥ ॥इति
श्रीसत्याषाढहिरण्यकेशीस्मार्त्तप्रयोगरत्ने वैशंपायनमहेशभट्टकृ
तो जातकर्मप्रयोगः॥ ॥अथ षष्ठीपूजा॥ ॥पंचमे षष्ठे पि वादि
ने पूर्वरात्रौ प्रदोषकाले पित्रादिराचम्य देशकालौ संकीर्त्य सूतिकायाः

शिशोर्मम सकलारिष्टशांतिद्वारायुरारोग्याभिवृद्धिद्वारा च श्रीपरमेश्वर
प्रीत्यर्थं विघ्नेशजन्मदाषष्ठीदेवीजीवंतिकानां यथामीलितोपचारैः पू
जनं करिष्ये इति संकल्प्य ॥ आसनादिकलशपूजनं विधाय पूजितसूत्र
ने पीठादौ यथाचारं विघ्नेशादीनावाह्य षोडशोपचारैः पंचोपचारैर्वा पू
जयित्वा मंत्रास्तु ॥ गणानां त्वा॰ स्यूयवसादि॰ गौरीर्मिमाय॰ तत्त्वायामीति
मंत्रः ॥ प्रार्थयेत् ॥ गौरीपुत्रो यथा स्कंदः शिशुत्वे रक्षितः पुरा ॥ तथा मम
प्ययं बालः षष्ठिके रक्षितां नमः ॥ कार्त्तिकेय महाबाहो पार्वतीहृदिनंदन ।
कुमारं रक्ष भीतिभ्यः पाहि देव नमोस्तु ते ॥ शक्तिस्त्वं सर्वदेवानां लोकानां हि
तकारिणी ॥ मातर्बालमिमं रक्ष महाषष्ठि नमोस्तु ते । ॥ ततः षष्ठीस्कंद ४२

भगवतीभ्यः माषभक्तबलिं समर्पयामि ॥ बलिं दत्वा ब्राह्मणान् गंधतांबू
लादिभिः संपूज्याशिषो वाचयित्वा ॥ स्वसंबंधिबांधवादिभिः सह अपूपा
दिखाद्यभक्षणं कुर्यात् ॥ जन्माशौचमध्ये प्रथमपंचमषष्ठदशमदिने
षु नाशौचदोषः ॥ अंनग्रहणे दोष एव ॥ पुरुषाः शस्त्रहस्ताः स्त्रियो गीति
कारिण्यास्यां रात्रौ जागरणं कुर्युः ॥ सूतिकागृहे च धूपाग्निदीपशस्त्रमुस
लविन्यास युतं कार्यं ॥ सर्षपादिविकिरणमन्यदपि शां तिसूक्तपाठादि य
थाचारं कार्यं ॥ ॥ इति षष्ठीपूजा ॥ अथ नामकरणप्रयोगः ॥ ॥ अत्र
मातापुत्रयोः पितुश्च त्रयाणां द्वादश्यामेवाशौचनिवृत्तिः ॥ नतु कादश्यां ॥
स्नानागारशुध्याद्यादि द्वादश्यां विधानात् ॥ जन्मतो द्वादशादिवसे नाम दध्या

हि०मं०प्र तु॥ स्वकालप्राप्तमपिविष्टिवैधृतिव्यतीपातग्रहणसंक्रांत्यमावास्यापि
४३ तृश्राद्धदिनेषुनकार्यं॥ स्वकालेक्रियमाणस्यगुरुशुक्रास्तबाल्यवार्ध
कवक्रातिचारमलमासादिनिषेधोनास्ति॥ मातापुत्रयोः पितुश्चस्ना
नंखननलेपनादिगारशुद्धिंकारयित्वासूतिकाग्निंबहिःपरिहृत्य॥ औ
पासनाग्निमानीयायतनेस्थाप्यप्राङ्मुखउपविश्यदक्षिणतःकुमार
सहितांभार्यामुपवेश्यदेशकालौसंकीर्त्य॥ अस्यशिशोर्बीजगर्भ
समुद्भवैनोनिबर्हणद्वारायुर्वर्चोभिवृद्धिद्वाराव्यवहारसिद्धिद्वा
च राश्रीपरमेश्वरप्रीत्यर्थंनामकरणाख्यंकर्मकरिष्येइतिसंकल्प्य॥ ४३
तदंगंगणपतिपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंचक

रिष्ये॥ इतिसंकल्प्य॥ उक्तरीत्याकुर्यात॥ पूर्वाह्णेज्योतिर्विदुक्तेकालेनामक
रणंकार्यं॥ नामदानांगत्वेनउद्धननादिकमेकरिष्येइति॰ गृह्याग्निमुपस
माधायपार्थिवमामानंप्रतिष्ठाप्यसमित्त्रयमादायश्रद्धएहीत्यादिप्राणाया
मांतंकृत्वानामदानहोमकर्मणियक्ष्यमाणादेवताःपरिगृहीष्यामीत्यादि
व्याहृत्यंतमुक्त्वात्रप्रधानहोमे॥ धातारंचतुःअनुमतिंचतुःराकांद्विःसिनी
वालींद्विःकुहूंचाज्येनयक्ष्ये॥ ॥ अंगहोमेवरुणंद्विरित्यादिसंस्रावेणेत्यं
तमुक्त्वा॥ समिधोग्नावाधायव्याहृत्यंतंहुत्वाप्रधानहोमः॥ धाताददातुनो
रयिमितिचतस्त्रोधात्रीर्जुहोतिपूर्ववत॥ अनुनोद्यानुमतिर्यज्ञंदेवेषुमन्य
तां॥ अग्निश्चहव्यवाहनोभवतांदाशुषेमयस्वाहा॥ अनुमत्याइदं॰ अन्वि

दनुमतेत्वंमन्यासैन्नंचनःकृधि॥ क्रत्वेदक्षायनोहिनुप्रणआयूंषितारिषःस्वा
हा॥ अनुमत्याइदं॰ अनुमन्यतामनुमन्यमानाप्रजावंतः रयिमक्षीयमाणं॥
तस्यैवयंहेडसिमापिभूमसानोदेवीसुहवाशर्मयच्छतु स्वाहा॥ अनुमत्या
इदं॰ यस्यामिदंप्रदिशियद्विरोचतेनुमतिंप्रतिभूषंत्यायवः॥ यस्याउपस्थ
उर्वंतरिक्षं सानोदेवीसुहवाशर्मयच्छतुस्वाहा॥ अनुमत्याइदं॰ राकामहं
सुहवां सुष्टुतीहुवेशृणोतुनः सुभगाबोधतुत्मना॥ सीव्यत्वपःसूच्या
च्छिद्यमानयाददातुवीरं शतदायमुक्थ्यं स्वाहा॥ राकायाइदं॰ यास्तेरा
केसुमतयःसुपेशसोयाभिर्ददासिदाशुषेवसूनि॥ ताभिर्नोअद्यसुम
नाउपागहिसहस्रपोषं सुभगेरराणस्वाहा॥ राकायाइदं॰ सिनीवालि ४४

पृथुष्टुकेयादेवानामसिस्वसा॥ जुषस्वहव्यमाहुतंप्रजांदेविदिद्दिनःस्वाहा॥
सिनीवाल्याइदं॰ यासुपाणिःस्वंगुरिःसुषूमा बहुसूवरी॥ तस्यैविश्पत्न्यैह
विःसिनीवाल्यैजुहोतुनःस्वाहा॥ सिनीवाल्याइदं॰ कुहूमहं सुभगांविद्म
नापसमस्मिन्यज्ञेसुहवांजोहवीमि॥ सानोददातुश्रवणंपितृणांतस्यास्ते
देविहविषाविधेमस्वाहा॥ कुह्वाइदंनमम॥ ॥इतिद्वादशरात्रेयोदशवाहुती
र्हुत्वा॥ ततइमंमेवरुणेत्यादित्रिचदन्नहोमंपुण्याहवाचनांतंकृत्वासमा
प्य॥ ततोनामदानं॥ तत्रप्रथमंकुलदेवतानाममहा लक्ष्मीभक्तइत्यादि॥
ततोजन्मकालीनमासनामतत्र॥ कृष्णोनंतश्च्युतश्चक्रीवैकुंठोथजनार्दनः॥
उपेंद्रोयज्ञपुरुषोवासुदेवस्तथाहरिः॥ योगीशःपुंडरीकाक्षोमासनामा

न्यनुक्रमात्॥ तत्र यथान्वारंचैत्रादिमार्गशीर्षादिवाक्रमः॥ ॥ ततोव्यवाहा
रिकंनाम॥ तत्रैवंव्यवस्थावक्ष्यमाणप्रकारेणकृत्रिमन्नामद्वयंकार्यं॥ एवंगु
प्तमपरंव्यवहाराय॥ व्यावहारिकन्नक्षत्रनामद्वितीयमितिद्रष्टव्यं॥ एवंसो
मयाजीतृतीयमित्यपि॥ गुप्तंतुनामपुण्याहवाचनास्यूर्वंशुभे काले कार्यं॥
तच्च मातापितरावेवजानीतः॥ यावज्जीवंगुप्तंमौंजीबंधनेपुत्रोवाजानीते
भिवादनेतच्चस्वत्रिपुरुषवाचिदेवतावाचिवा॥ अथवास्वेष्टं॥ द्व्यक्षरंकुमा
रंनामप्रतिष्ठाकामः॥ चतुरक्षरंब्रह्मवर्चसकामः॥ तच्चघोषवदादिअंत
रंतस्थदीर्घपरंविसर्गांतंवास्यूपसर्गांतंवानामकार्यं॥ ततोनाक्षत्रंनामज्यो
तिशास्त्रोक्ता अवकहडाचक्रानुसारेणजन्मनक्षत्रपादप्रयुक्ताक्षरा ४५

दिनाम॥ तच्च॥ चुचेचोलाश्विनी॥ लिलूलेलोभरणी॥ आइउएकृत्तिका॥ वोवा
विवूरोहिणी॥ बेबोकाकीमृगशिरः॥ कुघंङछआर्द्रा॥ केकोहाहिपुनर्वसुः॥
हुहेहोडापुष्यः॥ डीडूडेडोआश्लेषा॥ मामीमूमेमघा॥ मोटाटीटूपूर्वाफ
ल्गुनी॥ टेटोपापीउत्तराफल्गुनी॥ पूषाणाठाहस्त॥ पेपोरारी चित्रा॥
रूरेरोतास्वाती॥ तीतूतेतोविशाखा॥ नानीनूनेअनूराधा॥ नोयायीयू
ज्येष्ठा॥ येयोभाभीमूळ॥ बधाफाढापूर्वाषाढा॥ भेभोजाजीउत्तराषा
ढा॥ जूजेजोखाअभिजित्॥ खीखूखेखोश्रवणः॥ गागीगूगेधनिष्ठा॥
गोसासीसूशततारका॥ सेसोदादीपूर्वाभाद्रपदा॥ दूथंझञाउत्तराभा
द्रपदा॥ देदोचाचीरेवती॥ इति॥ अथबोधायनोक्तेजाताधिकारवि

हि॰मन्त्र॰ ४६

हिताणादिप्रत्ययांतं नाक्षत्रं नामतच्च ॥ रेरोमृमृज्येच्चिषुरहिरादोठात्ये
चवांत्यश्रवणाश्वयुक्षु ॥ शेषेषुनाम्नोः कपरः स्वरांत्योस्वाघोरदीर्घ
विसर्गइष्टः ॥ १ ॥ आश्वयुक् ॥ आश्वयुजः ॥ अपभरणः ॥ आपभरणः ॥
बहुलः ॥ रोहिणः ॥ रोहिणः ॥ मृगशीर्षः ॥ मार्गशीर्षः ॥ आर्द्रकः ॥ आर्द्रः ॥
पुनर्वसुः ॥ तिष्यः ॥ आश्लेषः ॥ मघः ॥ माघः ॥ फाल्गुनः ॥ फल्गुनः ॥ हस्तः ॥
चित्रः ॥ चैत्रः ॥ स्वातिः ॥ विशाखः ॥ अनूराधः ॥ ज्येष्ठः ॥ ज्येष्ठः ॥ मूलः ॥ मूल
कः ॥ आषाः ॥ अषाढः ॥ अषाढीयः ॥ अभिजित् ॥ आभिजितः ॥ आभि
जः ॥ श्रवणः ॥ श्रावणः ॥ श्राविष्ठीयः ॥ शतभिषक् ॥ शातभिषः ॥ प्रोष्ठपदः ॥ ४६
प्रोष्ठपदः ॥ रेवतः ॥ रेवतः ॥ इति ॥ एतच्चसर्वंनामशर्मांतंब्राह्मणस्यका

र्यं ॥ अत्रायंशिष्टाचारः ॥ तंदुलान्कांस्यादिपात्रेकृत्वातदुपरिसुवर्णशलाकया
लिखेत् ॥ प्रथमंकुलदेवतानाम ॥ ततोमासनाम ॥ ततोव्यवाहारिकं ॥ ततोना
क्षत्रंचतुष्टयंलिखित्वानामदेवताभ्योनमइतिगंधादिदक्षिणांतोपचारैःसंपू
ज्य ॥ ततः कर्ताकुलदेवतानाम्नामाहालक्ष्मीभक्तोसीतिस्वदक्षिणेविद्यमान
स्यमातुरुत्संगस्थस्यशिशोर्दक्षिणेकर्णेकथयित्वानर्यप्रजांमेगोपाय ॥ अ
मृतत्वायजीवसे ॥ जातांजनिष्यमाणांच ॥ अमृतेसत्येप्रतिष्ठितां ॥ इत्यादि
नाप्रतिष्ठाप्य ॥ विप्रैर्नामसुप्रतिष्ठितमस्त्वित्युक्तेमहालक्ष्मीयंभवतःसर्वा
न्ब्राह्मणानभिवादयते ॥ आयुष्मान्भवतु ॥ महालक्ष्मीभक्त इति विप्रैरुक्ते ॥
अस्मैमहालक्ष्मीभक्तायपुण्याहंभवंतोब्रुवंतु इतित्रिः ॥ ॐ पुण्याहमि

हि॰म॰प्र॰ ४७

तित्रिर्विप्राः॥ एवं स्वस्तिं भवंतो ब्रुवंत्विति त्रिः॥ ओं स्वस्तीति त्रिः॥ एवं ऋद्धिं भ
वंतो ब्रुवंत्विति त्रिः॥ ओं ऋद्धिरिति त्रिः॥ एवं त्रिः शिष्टनामत्रयेपि पुण्याहवाचनं
कार्यं॥ ततो नीराजनं कारयित्वा॥ श्रीरस्त्वित्याद्युक्त्वा प्रजापतिः प्रीयतामित्यु
क्त्वा पुण्याहवाचनं कारयित्वाभिषेकं कृत्वा ततः कर्मांगत्वेन दशाधिकब्राह्म
णभोजनं संकल्प्य ब्राह्मणान्गंधादिना संपूज्य भूयसीं दक्षिणां दत्वा॥ तेभ्य
आशिषो ग्राह्या॥ मम नाम प्रथमति मंत्राः॥ ततः प्रमादात्कृतं तां कर्मसा
द्गुण्याय विष्णुस्मृत्वा शिष्टैरिष्टैश्च सह भोजनं कुर्यात्॥ ॥ इति श्रीसत्या
षाढहिरण्यकेशीस्मार्तप्रयोगरत्ने वैशंपायनमहेशभट्टकृते नामकर ४७
णप्रयोगः॥ ५ ॥ अथ प्रवासादागते पुत्रे पितरि वा पुत्रदर्शने सति पि

तुरेव नैमित्तिकं कर्मोच्यते॥ पिता पुत्रमभिमृशति॥ सोमस्यत्वाद्युम्नेनाभि
मृशाम्यग्नेस्तेजसा सूर्यस्य वर्चसेति॥ ततो मूर्ध्न्याघ्रायति॥ पशूनां त्वा
हिंकारेणाभिजिघ्राम्यमुकशर्मन् आयुषे वर्चसे हुमिति॥ ततः स्वदक्षिणेन
हस्तेन पुत्रस्य दक्षिणं हस्तं उत्तानं सांगुष्ठं गृह्णाति॥ अग्निरायुष्मानिति पंचभिः
पर्यायैः॥ अग्निसोमयज्ञब्रह्मदेवा इति। ततः आयुष्टे विश्वतो दधदिति॥
अग्नेः पृथिव्यां प्रतितिष्ठ वायोरंतरिक्ष इति मंत्रद्वयं पुत्रस्य दक्षिणकर्णे जप
ति। ततः आयुर्दा अग्ने। अग्नेः पृथिव्यामिति मंत्रद्वयमुत्तरे कर्णे॥ इदं या
वज्जीयं यावदुपनयनं वापि नैमित्तिकं। अथ स्वगृह्यानुक्ता अपि केचन
संस्काराः॥ शिष्टपरिगृहीतत्वेनावश्यकत्वात्स्मार्तालिख्यंते॥ ॥ अथायु

द्वि.प्र.म. वर्धापनप्रयोगः॥ जन्मनक्षत्रे प्राक्संस्कारात्प्रतिमासं नक्षत्र होमः॥ ततऊ
४८ र्ध्वसंवत्सरे संवत्सरे बाल्ये पित्रादि कुर्यात्॥ ऊर्ध्वं स्वयमेव कुर्यात् सौरमा
नेन॥ यजमानः कृतावश्यकक्रियः सर्वौषधियुतजलपूरितकलशं संपूज्य
तदुदकेन स्नात्वा शुक्लांबरधरोलंकृतः कौतुकमाबध्य प्राङ्मुख उपविश्य
देशकालौ संकीर्त्य ममाब्दपूर्तिजन्मदिवसे आयुरभिवृद्धिद्वारा श्रीप
रमेश्वरप्रीत्यर्थं आयुर्वर्धापनाख्यं कर्म करिष्ये॥ इति संकल्प्य॥ गणप
तिं संपूज्य पुण्याहं वाचयित्वा॥ ॥आयुर्वर्धापनांगत्वेन उद्धननादिक
र्म करिष्ये इति संकल्प्य आघारवतांतंत्रेण आपूर्विकेण वा स्थालीपाकः ४८
कार्यः॥ यदि सिद्धचरुर्गृह्यते॥ तदा देवपवित्राख्यं संस्कारं कृत्वा ग्राह्यः॥

तत्र उद्धननादिभूसंस्कारं विधाय तत्र बलवर्धननामानमौपासनाग्निं लौ
किकाग्निं वा प्रतिष्ठाप्य प्रज्वाल्य समिद्द्वयमादाय अग्ने गृहीत्यादि प्राणाया
मांतं कृत्वा॥ आयुर्वर्धापनहोमकर्मणि यक्ष्यमाणा देवताः परिगृहीत्यादि
सामान्य प्रधानांतमुक्त्वा प्रधानहोमे अमुकजन्मनक्षत्रं तद्देवतां च अष्टो
त्तरशतसंख्यया अष्टाविंशतिसंख्यया वा चरुणा यक्ष्ये॥ अंगहोमे वरुणं
द्विरित्यादि व्याहृत्यंतं कृत्वा जन्मनक्षत्र तद्देवतां च चरुणा तत्तन्नाममंत्रे
ण हुत्वा होमशेषं समाप्य नात्र स्विष्टकृन्द्धोमः॥ स्वजननक्षत्रं तद्देवतां च
देवं वरुणं च यथोपचारैः संपूज्य कृताभिषेको यथाशक्ति स्वजनबंधुसुहृत्स्व
जनं स्ववाहनादि पूजां च कृत्वा ब्राह्मणान्भोजयित्वा गंधवस्त्रादिभिरलंकृतः

पतिपुत्रवती भिर्नीरांजितो ब्राह्मणाशिषो गृहीत्वा हविष्याश्नीयात् ॥ उपहोमे
शुनासीरित्रिवृहदन्नहोमः ॥ आपूर्विकपक्षेणवा चरुहोमः कार्यः ॥ ॥ इत्यायु
र्वर्धनप्रयोगः ॥ ॥ अथ शिशोः पर्यंकारोपणं जन्मदिनाद्द्वादशे षोडशे वा
द्वाविंशे अन्यस्मिन्वा ज्योतिःशास्त्रोक्तमृदुक्षिप्रनक्षत्रादियुक्ते शुभकाले य
थाचारं कुलदेवतापूजां विधायालंकृतं शिशुं हरिद्राद्यलंकृते पर्यंके मात्राद्याः
सौभाग्ययुतास्त्रियो जलशायिनं हरिं संस्मृत्य गीतवाद्यादि समकालं प्रा
क्शिरसं स्थापयेयुः ॥ यथाचारं कुलदेवताश्च पूजयेत् ॥ ॥ अथ दुग्ध
पानं ॥ ॥ एकत्रिंशद्दिने द्वितीयजन्मनक्षत्रदिने वा यथाचारमन्यस्मिन्वा
दानयुते शुभकाले कुलदेवतापूजां विधाय गोक्षीरं शंखेन मातान्यावा ४९

स्वभगा कुमारं दक्षिणशिरसं प्राक्शिरसं वा पाययेदिति ॥ ॥ अथ कर्णवेधः ॥
जन्मदिनाद्द्वादशे षोडशे वा दिने षष्ठसप्तमाष्टमेमासान्यतमे मासे दंतजननात्
पूर्वमेव ज्योतिर्विदादिष्टे शुभे काले पूर्वाह्णे वा मध्याह्ने विष्णुशिवब्रह्मचंद्रसूर्य
दिग्गीशानासत्यसरस्वतीकुलदेवतागोब्राह्मणान्यथाविभवं संपूज्य मातुरुत्सं
गरूढस्य वालं कृतस्य शिशोः प्राङ्मुखस्योदङ्मुखस्य वा कुशलेन सूचवर्णादिसू
च्या कर्णौ वेधयेत् दृनावृते सूर्यरश्मि पातस्थले ग पाहो कुमारस्य पूर्वं दक्षिणः कु
मार्या वामः ॥ वेधकश्चित्तीयनक्षत्रे सालनं कार्यं ॥ आभरणक्षमता भवति त
था वर्धनीयो ॥ पुंसः सूर्यरश्मिप्रवेशयोग्यरंध्रपर्यंतं वर्धयेत् ॥ × धारण ×
लंबकर्णता तु निषिद्धा ॥ स्त्रीणां तु यथेष्टं ॥ ॥ अथ सूर्यावलोकनं निष्क्र

हि॰अ॰म॰
५०

मणंच॥ ॥तृतीयमासिजन्मदिनेजन्मभेवाइष्टदेवतापूजनपूर्वकंशि
शुनासोत्सवंसूर्यदर्शनंकारयित्वा॥चतुर्थेमासिशुभेकालेवाचंद्रं
धेनुंचदर्शयेत्॥अथवानिष्क्रमणेनसहैवकार्यं॥चतुर्थेषष्ठेवामासि
शुक्लपक्षेशुभतिथ्यादौपितासभार्यःसशिशुश्च अभ्यंगस्नानंकृतकौतु
कश्चप्राङ्मुखउपविश्यदेशकालौसंकीर्त्य॥ममास्याःशिशोरायुरारभिवृ
द्धिद्वाराबीजगर्भसमुद्भवैनोनिबर्हणद्वाराच्चश्रीपरमेश्वरप्रीत्यर्थंसूर्याद्य
वलोकनंनिष्क्रमणंचकरिष्ये इतिसंकल्प्य॥तदंगंगणपतिपूजनंपुण्याहवा
चनंचकरिष्ये इतिसंकल्प्यकृत्वा॥ततःइंद्राग्नियमनिर्ऋतिवरुणवायुकु ५०
बेरेशानानांदिक्पालानांचंद्रार्कवाय्वादिदेवानांचयथाक्रमंपूजांकृत्वा

ब्राह्मणान्संपूज्यशिशुमलंकृत्याग्निचंद्रधेनूनांदर्शनंकारयित्वामंत्रान्पठे
त्॥चंद्रसूर्यौदिगीशानांदिशांचवरुणस्यच॥निक्षेपार्थमिमंदद्मितेत्वांरक्ष
तुसर्वदा॥अप्रमत्तंप्रमत्तंवादिवारात्रिमथापिवा॥रक्षंतुसततंसर्वेदेवाः
शक्रपुरोगमाः॥एवंशिशुरक्षार्थंदेवान्संप्रार्थ्य॥विष्णुशिवालयोरन्यत
रंबंधुगृहेवागत्वातत्रतत्रदेवंपुष्पोपहारादिभिःसंपूज्य॥गोमयाद्युपलिप्त
चतुरस्रेदेशेधान्यादिनिधायतत्रशिशुमाशाययित्वामंत्रेणरक्षांकुर्यात्॥
ॐहौंजूंसः।त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं॥उर्वारुकमिवमिवबंध
नान्मृत्योर्मुक्षीयमामृतात्सः जूंहौंॐ॥इत्येवंमृतसंजीवनरूपंमंत्रंप
ठेत्॥विभूत्याअक्षतैर्वाललाटेमूर्ध्निरक्षांकृत्वा॥अपूपादिभिर्भूत

हि॰मन्प्र॰ त्वागणेशंसमभ्यर्च्यशिशुंभक्ष्यादिनातोषयित्वादेवताप्रणामंप्रदक्षिणात्र
५१ यंचशिशुनाकारयित्वामातुलायासनबंधुगृहेपूर्ववन्नीत्वातत्रशिशुंतोष
यित्वास्वगृहंगत्वाब्राह्मणेभ्योदक्षिणांदत्वाशिषोवाचयित्वा॥अग्निरायु
ष्मानितिमंत्राः॥ ॥इतिनिष्क्रमणं॥ ॥अथोपवेशनं॥पंचमेमासिशु
क्लपक्षेपूर्वाह्णेज्योतिर्विदुक्तेमुहूर्तेगणेशंपूजयित्वापुण्याहंवाचयित्वाव
राहंपृथिवीदेवगुरुद्विजान्पूजयित्वाभूमिमुपलिप्यतत्रमंडलंकृत्वाशंखतू
र्यादिमांगलिकध्वनौक्रियमाणेशिशुमुपवेशयेदभिर्मंत्रैः॥रक्षैनंवसुध
देविसर्वदासर्वगंशिशुं॥आयुःप्रमाणंनिखिलंनिक्षिपस्वहरिप्रिये॥अ ५१
चिरादायुषस्त्वस्ययेकेचित्परिपंथिनः॥जीवितारोग्यवित्तेषुनिर्दहस्वाचि
रेणतान्॥धारिण्यशेषभूतानांमातस्त्वमधिकाह्यसि॥कुमारंपाहिमा

तस्त्वंब्रह्मातदनुमन्यतां॥ततोब्राह्मणान्संपूज्याशिषोग्राह्याः॥कर्मसाद्गु
ण्यायविष्णुंस्मरेत्॥कुमार्याअप्येवमेवकुर्यात्॥इतिस्मार्तानि॥ ॥
अथान्नप्राशनप्रयोगः॥ ॥जन्मतःषष्ठमासिअष्टमेवादंतेषुजातेषुवा
ज्योतिर्विदादिष्टमुहूर्तेशुक्लपक्षेपूर्वाह्णेपित्रादिःशिशोरन्नप्राशनंकुर्यात्॥
षष्ठमासिक्रियतेच्चेत्॥तदागुरुशुक्रबाल्यवार्धिकवक्रातिचारमौढ्यानिष दि
धोधिकमासनिषेधश्चनास्ति॥अन्नप्राशनचूडाकरणगोदानादिषुवैशेषि
कहोमोनास्त्यनुक्तत्वात्॥नामकरणस्थानेवैशेषिकहोमः॥केश्चिदत्रक्रिय
ते॥तत्तुस्कतरामशुद्धंप्रापकाभावात्॥जयादिनामुपहोमसंज्ञांकुर्वतां॥अ
न्नप्राशनादिषुनास्तिप्रधानहोमइतिसूचितंच॥उपप्रधानेह्ययतरत्तु

हि॰प्र॰म॰
५२

पहोमः ॥ यत्रप्रधानहोमो नास्ति ॥ तत्रव्याहृत्यंतं सामान्यहोमः प्रधानहोमत्वे
नचविवक्षितइति ॥ अतएवयुक्तोवहइत्यादिव्याहृत्यंतेषु सामान्यप्रधानमि
तिशिष्टानांव्यवहारश्च ॥ कर्ताकृतमांगलिकः प्राङ्मुखउपविश्यसंस्कार्य
सहितांभार्यांचोपवेश्यदेशकालौसंकीर्त्यममास्य शिशोर्मातृगर्भमलप्रा
शनेनोनिबर्हणबीजगर्भसमुद्भवैनोनिबर्हणद्वाराच अन्नाद्यब्रह्मव
र्चसतेजइंद्रियायुरभिवृद्धिद्वाराच श्रीपरमेश्वरप्रीत्यर्थं अन्नप्राशना
ख्यंकर्मकरिष्ये ॥ इतिसंकल्प्य ॥ तदंगं गणपतिपूजनं पुण्याहवाचनं
मातृकापूजनंनांदीश्राद्धंचकरिष्यइतिसंकल्प्य ॥ कृत्वाततः उल्लेखनादि ५२
भूसंस्कारं विधाय औपासनाग्निं ॥ पित्रातिरिक्तेकर्तरिलौकिकं ॥ शु

चिनामानमग्निंप्रतिष्ठाप्य प्रज्वाल्यसमित्त्रयमादायअग्नएहीत्यादिप्राणायामं
तंकृत्वा ॥ अत्र प्राशनहोमकर्मणि यक्ष्यमाणादेवताः ॥ इत्यादिजातवेदसमग्नि
मिध्मेनेत्यादि ॰ सामान्यप्रधानांतं कृत्वा नात्रप्रधानहोमः ॥ अंगहोमादिसं
स्थाजपांतं कृत्वा त्रिवृदन्नहोमं पुण्याहवाचनांतं समाप्य ॥ ततः स्वदक्षिणे
मातुरुत्संगस्थशिशुं दधिमधुघृतमिश्रं कृत्वा ॥ मंत्रत्रयेवारत्रयं प्राशयति ॥
प्राशनसूत्रेमंत्राणांसमुच्चयद्योतकपदाभावात् ॥ भूरस्त्वयिदधामिभुवस्त्व
यिदधामिसुवस्त्वयिदधामिइतिततोन्नमेकवारं प्राशयति ॥ अपांत्वौषधी
नां रसं प्राशयामि शिवास्तआपत्वौषधयः संत्वनमीवास्तआप औषध
योभवंत्विति ॥ ततोयथेष्टं प्राशयित्वामुखं प्रक्षाल्य बालकं भूमावुपवेश्य ॥

तदग्रे पुस्तकवस्त्रशस्त्रादि शिल्पानि विन्यस्य स्वेच्छया शिशुर्यत्स्पृशेत्तत्सास्य जी
विकेति परीक्षां कुर्यात् ॥ ततः कर्मांगत्वेन दशाधिकां ब्राह्मणभोजनं भूयसीं
दक्षिणां संकल्प्य दत्वाशीषो वाचयित्वा कर्मसाद्गुण्याय विष्णुं स्मरेत् ॥ कु
मार्या अप्यमंत्रकं कुर्यात् ॥ ॥ इति श्रीसत्याषाढहिरण्यकेशीस्मार्तप्रयो
गरत्ने प्रथमे संस्कारप्रकरणे वैशंपायनमहेशाभट्टकृतौ अन्नप्राशनप्रयो
गः ॥ ॥ अथ चूडाकरणप्रयोगः ॥ ॥ गर्भतो जन्मतो वा तृतीये वर्षे पंचमे
वा अगर्भिण्यां मातरि पंचमवर्षादूर्ध्वं गर्भिण्यामपि गुरुशुक्रबाल्यवार्धका
द्यभावे अक्षयनधिके चमासि उदगयने शुक्लपक्षे ज्योतिर्विदुक्ते काले चूडा
कर्म कार्यं ॥ यदि गर्भाधानादयः संस्काराः स्वकाले न जाताः ॥ तदा चौलात्प्रा ५३
क् गर्भाधानादिसंस्काराणां अकरणजन्यदोषपरिहाराय प्रायश्चित्तं कृ

त्वा गर्भाधानादयः संस्कारास्तंत्रेण वक्ष्यमाणप्रकारेण सर्वे कर्तव्याः ॥ चौ
लं तु उपनयनात्प्राक् संस्कारेभ्यः पृथक् ॥ उपनयनदिवसे उपनयना
त्पूर्वं कार्यं ॥ यजमानः कृतमांगलिकः प्राङ्मुख उपविश्य दक्षिणतः कुमा
रसहितां भार्यां चोपवेश्य प्राणानायम्य देशकालौ संकीर्त्य ॥ अस्य कुमा
रस्य बीजगर्भसमुद्भवैनोनिबर्हणद्वारायुर्वर्चोभिवृद्धिद्वारा च श्रीपर
मेश्वरप्रीत्यर्थं चूडाकरणाख्यं कर्म करिष्ये ॥ तदंगं गणपतिपूजनं पु
ण्याहवाचनं मातृकापूजनं नांदीश्राद्धं अंकुरारोपणं च करिष्य इति
संकल्प्य कृत्वा ॥ ततः उद्धननादि भूसंस्कारं विधाय सभ्यनामानमौपा
सनाग्निं प्रतिष्ठाप्य अन्यकर्तृकचैलौकिकाग्नौ आयतने तु अग्निं प्र

हि॰ग्रन्म॰ ज्वाल्य समित्रयमादाय श्रद्ध एहीत्यादि प्राणायामांतं कृत्वा॥ चौलहोम
५४ कर्मणि यक्ष्यमाणा देवताः परिग्रहीष्यामि जातवेदसमग्निमिध्मेने त्या
दि व्याहृत्यंतमुक्त्वा॥ नात्र प्रधान होमः॥ अंग होमे वरुणं ह्विरित्यादि
आ संस्राजपांतं कृत्वा॥ अग्नेः पश्चाद्दक्षिणतः कुमार उपवेश्य मध्ये आ
चार्यः उत्तरतो माता ब्रह्मचारी वा कश्चित्संयमनार्थं आनडुहं गोमयं
शाकृतपिंडं धारयन्नुपविशति॥ बहिस्तप्ता आपः सीतासु संसृज्य तास्वा
दायदक्षिणं गोदानमुनत्ति॥ आप उ द तु जीवसे दीर्घायुत्वाय वर्चस इ
ति गावि पृथिव्यां दीयते स्वापार्थं अंगगोदानं॥ तानि मनुष्येऽचत्वारि तेषां ५४
उदनं जलेनार्द्रीकरणं तस्मिन्गोदाने ऊर्ध्वाग्रान्कुशान्निदधाति॥ ओ

षधे त्रायस्वैनमिति॥ तेषु क्षुरं निदधाति॥ स्वधिते मैनं हिंसीरिति॥ ततः
प्रवपति॥ देवश्रूरेतानि प्रवपे इति॥ एवमवशिष्टगोदानत्रये पि उदनादिव
पनांतं समानं कर्म॥ वपने पृथक् मंत्राः॥ दक्षिणं वपनं कार्यं॥ पश्चाद्वप
ति॥ येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान्॥ तेन ब्रह्मा
णो वपतेदमस्यायुर्ष्मान्रय्या वर्चसा सं सृजाथेति॥ तत उत्तरतः॥ ये
न पूषा बृहस्पतेरग्नेरिंद्रस्य चायुषेवपत्॥ तेन ते वपाम्यसु कन्दार्मन
इति संबुध्या संस्कार्यस्य नाम गृह्णाति॥ ततः पुरस्ताद्वपति॥ यथा ज्यो
क् सुमना असत्॥ ज्योक् च सूर्यं दृशे॥ एकाद्वे तिस्रः पंचवा यथाप्रदेशं
कुलधर्मानुसारेण चूडाः कार्याः॥ अथवा एकार्षेयस्य द्व्यार्षेयस्येति

हि०प्र०म० स्त्रः पंचार्षेयस्यपंच॥एकाचेन्मध्येकार्या॥द्वेचेन्मध्येपश्चात्॥तिस्रश्चेन्म
५५ ध्येपुरस्ताद्दक्षिणतः॥पंचचेत्प्रतिदिशंमध्ये॥चूडाः कार्या॥कुमारस्याव
नयकः॥कश्चित्तान्गोमयाच्छादितान्केशानादायगोष्ठउदुंबरेदर्भस्तं
बेवाअवटंकृत्वातस्मिंनिदधाति॥यत्रपूषाबृहस्पतिः स वितासोमो
अग्निः॥तेभ्योनिधानंबहुधाव्यैच्छंनंतराद्यावापृथिवीअपःस्वः॥इति
तत कृतश्मश्रुस्नानः कुमारः आचार्यादीन्प्रणमेत्॥सर्पिष्मतमोदनंनापिता
यदत्वा॥ब्राह्मणभोजनंभूयसींदक्षिणांच संकल्प्यदत्वाआशिषोवाच
यित्वा॥कर्मसाद्गुण्यायविष्णुंस्मरेत्॥ ॥इतिसत्याषाढहिरण्यकेशी ५५
स्मार्त्तप्रयोगरत्ने प्रथमेसंस्कारप्रकरणे वैशंपायनमहेशभट्टकृतो

चूडाकरणप्रयोगः समाप्तः॥ ॥अथगर्भाधानाद्यंतरितसंस्काराणां
तंत्रप्रयोगः॥ ॥प्रतिबंधवशात्उपनयनात्प्राक्अंतरितान्संस्कारान्
प्रारब्धेनसंस्कारेणसहतत्तत्कालातिक्रमप्रायश्चित्तंकृत्वासर्वांस्तंत्रेण
कुर्यात्॥चौलंतुसंस्कारेभ्यःपृथक्उपनयनदिवसेवाचौलंकृत्वाउपनयनंका
र्यं॥गर्भाधानादिचौलांतसंस्काराणांअगत्यगतौप्रायश्चित्तेनापिचरितार्थ
त्वं॥उपनयनप्रभृतिसंस्काराणांअत्यगतावपिकालातिक्रमेसतितत्का
लातिक्रमप्रायश्चित्तंकृत्वाप्युपनयनादयःसंस्कारास्त्ववश्यकर्तव्याः॥प्राय
श्चित्तंतुगर्भाधानादिप्रतिसंस्कारंपादप्राजापत्यः॥चूडायाःअर्धप्राजाप
त्यः॥आलस्यादिनालोपेद्विगुणंकार्यं॥तत्रजपहोमब्राह्मणभोजनंगोदा

हि॰प्र॰म॰ नाद्यन्यतमप्रत्याम्नायेनकार्यं॥प्रणवव्याहृतिसहितगायत्र्यासहस्रं
५६ तिलहोमः॥सप्रणवसमस्तव्याहृतिभिर्वा केवलेन प्रणवेनवा सहस्रं
तिलहोमः॥अयुतंगायत्रीजपोवाद्वादशब्राह्मणभोजनंवारुद्रैकादशि
नीजपोवाएकंगोदानंवा॥प्राजापत्यप्रत्याम्नायतीर्थयात्राद्यन्यदपि
यथासंभवंदेशकालकर्तृतारतम्येनप्रायश्चित्तंप्रकल्प्यकृत्वासंस्का
राःकार्याः॥गर्भाधानप्रभृतीनांतंत्रं॥तत्रसंस्कारेषुहोमस्त्वगं अंगजा
तंचसकृदनुष्ठितंसर्वत्रोपकरोतियदपिवैशेषिकमंगंसंप्रतिपन्नदेव ५६
ताकंचेत्सकृदेवानुष्ठेयं॥यत्तुविरुद्धधर्मंवैशेषिकमंगं॥तदनुष्ठेयमे
व॥नतस्यप्रसंगासिद्धिः॥अंगहोमेपिहोमेकिंचिदंगंकिंचित्प्रधानमि

तितुव्यवहारः॥प्रतिकर्मसाधारणंयत्तदंगं॥यत्कर्मविशेषंप्रतिविशिष्यवि
धीयंतेयद्वैशेषिकंप्रधानमितिचव्यवहारः॥वस्तुतस्तुतद्वैशेषिकंमुख्यक
र्मणोंगमेव॥यथाजयाद्यंगभूतोहोमोविधीयते॥तत्रयद्वैशेषिकंमंगंत
दन्वाधानादौप्रधानमितिचोच्यतेतत्सर्वमंगमेव॥एवमन्यत्रापिअंगप्रधा
नमितिचद्रष्टव्यं॥एवंचहोमोंगंगर्भाधानादीनिप्रधानानिअन्वर्थनामधेया
नि॥गर्भआधीयतेयेनकर्मणातत्समंत्ररेतःसेकादि॥पुमान्सूयतेयेन
कर्मणातत्पुंसवनंदधिद्रप्सादिप्राशनंसीमंतउंनीयतेयेनकर्मणात्रेण्याद्या
लल्यायक्रियते॥अन्नंप्राश्यतेयेनतत्॥अन्नप्राशनं॥उपआचार्यस्यस
मीपंनीयतेयेनतत्समंत्रंप्रधानोपनयनमित्येवमादीनिप्रधानानिपृथक्पृथग्

हि॰प्र॰म॰
५७

नुष्ठेयानि॥तत्र यः संयोगनिष्पन्नास्तेपि मंत्राः पठनीयाः॥ तावतीव संस्कार इति प्रयोगपारिजाते न्यत्र च॥ गर्भाधानस्य जातत्वाच्छयनाधानमंत्राः॥ रेतोवस्कंदनमंत्राश्च पठनीयाः॥ पुंसवनसीमंते च धात्रीचतुष्टयरूपं वैशेषिकं॥ अंगमुक्तं न देकवारमनुष्ठितं॥ स पुंसवने सीमंते चोपकरोति॥ न तस्यावृत्तिः॥ संप्रतिपंनदेवताकत्वात्तंत्रेणैव सिद्धिः॥ दधि इत्यादि प्राशनं सीमंतोन्नयनादिकं च प्रधानं समंत्रं पूर्ववदेव कुर्यात्॥ जातकर्मतु पि जाते इमनिपरसुमित्यादिका क्रिया यावाक्यते सा समंत्रा कार्या॥ अन्यत्र मंत्रपाठमात्रं॥ मेधाजननेघृतप्राशनादि सर्वं पूर्ववदेव कुर्यात॥ नामकर्मणि च होमे वैशेषिकमंगमुक्तं। धातादधातु नो रयिमिति द्वादशाहुती जुहोतित्रयोदशेत्येकेषामिति ५७

तत्तथैव होतव्यं तंत्रते पि केषां चिद्धिरुद्धधर्मत्वात्केषां चिदप्राप्तविधिना च यथाप्राप्त एव होमः॥ नामदानादिकं च सर्व पूर्ववदेव कुर्यात॥ अन्नप्राशनेतु वैशेषिकमंगमेव नास्ति॥ त्रिरन्नप्राशनमन्नप्राशनं च समंत्रपूर्ववदेव कार्यं॥ ॥प्रयोगः॥ स्नातः कृतमांगलिकः वस्त्राच्छादिते पीठे प्राङ्मुखः स्वदक्षिणतः पत्नीं संस्कार्यं चोपवेश्याचम्य प्राणानायम्य देशकालौ संकीर्त्य अस्य कुमारस्य बीजगर्भसमुद्भवैनोनिबर्हणक्षेत्रसंस्कारव्यवहाराम्नायव्रततेजइंद्रियायुरभिवृद्धिद्वारा च श्रीपरमेश्वरप्रीत्यर्थं अतिरितान् संस्कारान् गर्भाधानपुंसवनसीमंतोन्नयनजातकर्मनामान्नप्राशनसंस्कारान् तंत्रेण करिष्ये॥ अन्नप्राशनेन सहैवायथासंभवं द्रष्टव्यं॥

हि॰प्र॰म॰
५८

तदंगंगणेशपूजनादिनांदीश्राद्धांतंकृत्वा॥ उद्धननादिभूसंस्कारंविधायत
त्रोपासनाग्निंतदसंभवे लौकिकाग्निंवा आयतने निधायप्रज्वाल्यसमित्त्रय
मादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वा॥ पुंसवनसीमंतनामान्नप्रा
शनहोमकर्मणियक्ष्यमाणादेवताःरक्ष्यामि इत्यादिव्याहृत्यंतमुक्त्वा॥ वैश्वे
षिकप्रधानहोमे॥ धातारं चतुश्चतुः॥ अनुमतिंचतुः राकांद्विःसिनीवालींद्वि
कुहूश्चाज्येन अंगहोमेवरुणाद्विरित्यादिसंस्त्रावेणांत्यंतमुक्त्वा समिधोग्ना
वाधायव्याहृत्यंतेवैश्वेषिकहोमः॥ पुंसवनसीमंतयोस्तत्रणधात्रीचतुष्टयं
हुत्वा॥ ततोनामकरणास्थद्वादशात्रयादन्नावाहुतीहुत्वातत्रधात्रीणांअ
व्यवहितत्वात्प्रसंगसिद्धिः॥ इमंमेत्यादिसंस्थाजपांतंसमाप्य॥ त्रिदरहन ५८

होमबलीकरणांतंसमाप्य॥ पुण्याहवाचनेमत्यमित्यादिगर्भाधानपुंस
वनसीमंतनामकर्मादिन्नप्राशनकर्मकारिणेपुण्याहंभवंतोब्रुवंतित्वि
त्यादि॥ एवंस्वस्तिऋद्धिमित्यपि॥ एवंपुण्याहांतहोमविधिंसमाप्य॥
ततःक्रमेणप्रधानानि॥ तत्रगर्भाधानमंत्रान्पठित्वा॥ पुंसवनस्थोक्त
रीत्यादधिद्रप्सादिप्राश्य॥ सीमंतंचोन्नीय॥ जातकर्ममंत्रान्पठित्वा॥
मेधाजननेपूर्ववत्समंत्रंघृतंप्राश्य॥ अन्नप्राशनंतुपूर्ववदेवकार्यं॥ ततोभि
षेकंकृत्वा॥ कर्मणःसांगतासिद्ध्येब्राह्मणभोजनंसंकल्प्य॥ ब्राह्मणान्संपू
ज्याशिषोवाचयित्वाप्रमादात्कुर्वतांकर्मेतिकर्मसाद्गुण्यायविष्णुंस्मरेत्॥
गर्भाधानादिविवाहांताःप्रजासंस्काराःसंतःकेचनक्षत्रसंस्काराःअपि

हि॰ग्र॰प्र॰ तेचगृह्याग्नौ कर्तव्याः गृह्याग्न्यभावे लौकिकाग्नौ उपनयनादिविवा
५१ हान्ताः संस्काराः लौकिकाग्नावेव उपनयनादिसंस्काराणां तंत्रंभव
ति॥ पूर्वसंस्कारसंस्कृत एव॥ उत्तरसंस्कारे अधिकारी॥ गर्भाधाना
दीनां विवाहोपनयनमुखेन संस्कारास्नानं कुर्वताचार्येणोपनयना
दीनां प्राधान्यस्योक्तत्वादत्रापि तर्यसंनिहिते पितृव्यादिभ्रात्रादिः
संस्कारान्कुर्यात्॥ ॥ इतिश्रीसत्याषाढहिरण्यकेशीस्मार्त्तप्रयोग
रत्नेमहेशभट्टकृतौ संस्कारतंत्रप्रयोगः॥ ॥ अथोपनयनप्रयोगः।
उद्धनयनादिचतुर्थदिवसीयसावित्रीव्रतविसर्गान्तमुपनयनं॥ ज्योति ५१
र्विदादिष्टमुहूर्त्ते कुमारस्योपनयनं॥ ततः प्राग्दिनेतद्दिनेवाकृत

यइंद्रसूतये॥ इममग्न आयुषेवर्चसेकृधि प्रियंरेतोवरुणसोमराजन्।
मातेवास्मा अदितेशर्मयच्छ विश्वेदेवाजरदष्टिर्यथासदिति॥ इतिद्वाभ्या
आचार्यः प्राश्नंतं समीक्षते॥ अथवाकृतशेषमाज्यं पृषदाज्यंवा आभ्या
मेवप्राशयति॥ ततः कृतशुद्धाचमनः कुमार आचार्यं तूष्णीं स्पृशति॥
आचार्यश्चैनमभिमंत्रयते॥ शतमिन्नुशरदो अंतिदेवायत्रानश्चक्राज
रसंतनूनां॥ पुत्रासोयत्रपितरोभवंतिमानोमध्यारीरिषतायुर्गंतोरि
ति॥ ततः प्रदक्षिणमग्निं चरंतं बटुं अभिमंत्रयते॥ आगंतासमगन्म
हिप्रसंमृत्युंयुयोतन॥ अरिष्टाः सचरेमहिस्वस्तिचरतादिहस्यागृहे
भ्यइति॥ ततोबटुंवाचयति॥ ब्रह्मचर्यमागां॥ उपमानयस्व॥ ब्रह्म

द्वि॰मं॰त्र॰ ६५

चारी भवानि॥ देवेन सवित्रा प्रसूत इति॥ ततः आचार्यः पृच्छति॥ को नामा
सीति॥ ततो माणवको व्यावहारिकं नाम नाक्षत्रं च नाम वदति॥ गिरिधरश
र्मासि रोहिणशर्मास्मीत्येवं प्रकारं॥ ततः आचार्यः स्वस्ति देव सवितरहं
मनेनामुनोद्धृच्चमन्नीय॥ अत्र मंत्रे अमुनेति पदं निष्काश्य बटोर्व्याव
हारिकं नाक्षत्रं च शर्मांतं तृतीयांतं नामद्वयं प्रक्षिप्य मंत्रः पठनीयः॥ स
च॥ स्वस्ति देव सवितरहमनेन गिरिधरशर्मणा रोहिणशर्मणोद्धृच्चम
न्नीयेत्येवं प्रकारेण नाममनीगृह्णाति॥ ततः कुशोरुभावात्मानं मार्जय
तः॥ शंनो देवीरभिष्टय आपो भवंतु पीतये॥ शंयोरभिस्रवंतु नः॥॥
इति॥ ॥अथ प्रधानोपनयनं॥ ॥ब्रह्मचर्यमागामुपमानय ६५

स्वेत्यादिना प्राप्तब्रह्मचर्यस्य बटोः स्वस्थान स्थितस्याचार्यस्य पितुः आत
रास्वस्तिकां किनमंतः पठं प्राकृछरंध तामंगल पद्यपाठे वाद्यादि घोषे
च क्रियमाणे सुलग्नसमये अंतः पटं आगपसार्य माणवकः गुरोर्हस्ते
नारिकेरादि फलं दत्वा पादयोरुपरि सुर्धानं निधाय नमस्कृते आचार्य ए
नमुत्थाप्य स्वदक्षिणोत्संगे प्राङ्मुखं उपवेश्य दध्यक्षतांस्तन्मूर्धनि क्षि
पेदेभिर्मंत्रैः॥ वेदविदो विप्राः अपि दध्यक्षतान्क्षिपेयुः॥ ते च मंत्राः॥ सां
ग्रहण्येष्याय॰ लोकस्य सम्मष्टे॥ अग्नेतेजस्विं तेजस्वीत्वं॰ सूर्यो भ्राजो
दधातु॰॥ ग्रहावै प्रतिष्ठासूक्तं॥ नर्य प्रजां मे गोपायेत्यादि अन्येपि॥ तत
आचार्यः वक्ष्यमाणोपनयन धर्मेण उदङ्मुखस्य बटोरुपनयनं कुर्या

हि॰प्र॰म॰
६६

त॥इदमेवोपनयनं।ज्योतिर्विदादिष्टे मुहूर्ते कर्तव्यं॥ततः आचार्यः कुमा
रस्य दक्षिणमंसं स्वदक्षिणेन हस्तेन सव्यं सव्येन तूष्णीमन्वारभ्य आत्मनो
दक्षिणेन हस्तेन ब्रह्मचर्यमुखेन तस्य हृदयं स्पृष्ट्वा समीपमुपनयति
भूर्भुवः स्वः तत्सवितुर्वरेण्यं॰ चोदयात्॥ देवस्य त्वा स॰ भ्यामुपन
ये अमुकशर्मन्॥ इदमुपनयनं नाविस्मरेत्॥ विस्मरणात्खिलं कर्मा
वर्तत इति मातृदत्ताचार्यः॥ ततः आचार्यः स्वदक्षिणेन हस्तेन बटोर्दक्षि
णं हस्तं सांगुष्ठमुत्तानं गृह्णाति॥ अग्निष्टे हस्तमग्रभीत्सोमस्ते हस्तमग्र
भीत्सविता ते हस्त॰ सरस्वती ते हस्तम॰ पूषा ते हस्त॰ बृहस्पतिस्ते हस्त॰ ६६
मित्रस्ते हस्तम॰ वरुणस्ते ह॰ त्वष्टा ते हस्त॰ धाता ते ह॰ विष्णुस्ते हस्त॰

प्रजापतिस्ते हस्तमग्रभीदिति ततो बटुं संत्रास्ति॥ सविता त्वाभिरक्षतु मि
त्रस्त्वमसि धर्मणाग्निराचार्यस्तव देवेन सवित्रा प्रसूतो बृहस्पते ब्रह्मचा
री भवामुकशर्मन्॥ अपोऽशान॰ समिध आधेहि कर्म कुरु मा दिवा स्वाप्सी
रिति॥ ततः स्वहस्तेन ब्रह्मचारिणो दक्षिणमंसमुपर्युपरि तूष्णीमन्वव
मृश्य हृदयदेशमभिमृशति॥ मम हृदये हृदयं ते अस्तु मम चित्तं चित्ते
नान्वेहि मम वाचमेकमना जुषस्व बृहस्पतिस्त्वा नियुनक्तु मह्यं मामे
वानुसंरभस्व मयि चित्तानि संतु ते मयि सामीच्यमस्तु ते मह्यं वाचं नि
यच्छतादिति॥ ततो नाभिदेशमभिमृशति॥ प्राणानां ग्रन्थिरसि समावि
स्रस इति॥ ततः कुमारमभिमंत्रयति॥ भूर्भुवः स्वः सुप्रजाः प्रजया भू

यासꣳस्फवीरोवीरैःसुवर्चावर्चसास्फपोषःपोषैःस्फमेधामेधयास्फब्रह्मा
ब्रह्मचारिभिरिति॥ततःपुनरभिमंत्रयति॥भूऋक्षुत्वाग्नौपृथिव्यांवा
चिब्रह्मणिददेअमुकशर्मन्॥भुवोयजुःषुत्वावायावंतरिक्षेप्राणेब्र
ह्मणिददेअमुकशर्मन्॥स्वःसामसुत्वासूर्येदिविचक्षुषिब्रह्म
णिददेअमुकशर्मन्॥इष्टंतस्तेप्रियोसानिअमुकशर्मन्॥अनळस्य
तेप्रियोसानिअमुकशर्मन्॥इदंवत्स्यावःप्राणआयुषिवत्स्यावःप्रा
णआयुषिवसाअमुकशर्मन्॥ततोब्रह्मचा णोदक्षिणहस्तमु
त्तानंसांगुष्ठंअग्निरायुष्मानितिपंचभिपर्यायैर्गृह्णाति।अग्निरायु
ष्मान्सवनस्पतिभिरायुष्मान्तेनत्वायुषायुष्मंतंकरोमि॥सोमआ

युष्मान्सवनस्पतिभिरायुष्मान्ते॰यज्ञआयुष्मान्सदक्षिणाभिरायुष्मा
न्ते॰ब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्मान्ते॰देवाआयुष्मंतस्तेमृतेनायुष्मंत
स्तेन॰मि॥५॥ततोमंत्रद्वयंदक्षिणकर्णेजपति॥आयुर्दाविश्वतोदधदय
मग्निर्वरेण्यः॥पुनस्तेप्राणआयुपिपरायक्ष्मꣳस्फवामिते॥अग्नौपृथि
व्यांप्रतितिष्ठवायावंतरिक्षेसूर्येदिवियाꣳस्वास्तिमग्निर्वायुरादित्यश्चइ
माआपोनुसंचरतितांꣳस्वास्तिमनुसंचरामुकशर्मन्॥प्राणस्यब्रह्मचा
र्यभूरमुकशर्मन्इति॥ततोमंत्रद्वयमुत्तरकर्णे॥आयुर्दाअग्नेहविषो
जुषाणो॰दिमं॥अग्नौपृथिव्यामितिच॥ततोब्रह्मचारिणोमुखेनमुख
ꣳसंनिधायजपति॥मेधांतइंद्रोददातुमेधांदेवीसरस्वती॥मेधांमे

प्रस· अश्विनावुभावाधत्तांपुष्करस्त्रजाविति॥ ततोब्रुडुमुत्थाप्यकशकादिदेवेभ्य
८ स्त्वांपरिददे॥ परिदेही तिब्रूक्तो॥ आचार्योद दाति॥ कशकायत्वापरिद
दामि॥ अंतकायत्वापरिददामि॥ अघोरायत्वापरि॰ गदायत्वापरि॰ यमा
यत्वापरि॰ मरवायत्वापरि॰ वह्निन्येत्वापरि॰ पृथिव्यैत्वासवैश्वानराये॰
अद्भ्यस्त्वापरिददा॰ ओषधीभ्यस्त्वा॰ वनस्पतिभ्य॰ विश्वेभ्यस्त्वादेव
भ्यःपरि॰ सर्वेभ्यस्त्वाभूतेभ्यःपरि॰ सर्वाभ्यस्त्वादेवताभ्यःपरिददामीति
परिदानं॥ पुनरुपनयनेपरिदानानंतरंसावित्रीवाचनं॥ पुनरुपनयन
प्रयोगमग्रेवक्ष्यामः॥ प्रथमोपनयनेपरिदानांतंकृत्वा॥ अक्षारल ६८
वणादिकंव्रतंकुमारस्यदिनत्रयमग्निसंनिधौकारयित्वात्र्यहेतीतेचतु

र्थेदिवसेप्रातःसावित्रीवाचनंकृत्वासप्तपलाशसमिद्धोमादिक्रमेणारवि·
लकार्यमित्येकंमतं॥ पोष्करसादेरपरमतं॥ सद्यःपोष्करसादेरिति॥ तदुच्य
ते॥ परिदानानंतरंमाणवकःदेशकालौसंकीर्त्य॥ ममेधाद्यभिवृद्धिद्वारा
ब्रह्मचर्यव्रतग्रहणांगंसमिद्धोमंकरिष्येइतिसंकल्प्यकारयित्वा॥ आचार्यः
घृतान्वक्तंसाग्रंपलाशसमित्सप्तकमादाय॥ अग्नयेसमिधमाहार्षंबृहतेजा
तवेदसे॥ यथात्वमग्नेसमिधासमिध्यसएवंमांमेधयाप्रज्ञयाप्रजयापशुभि
ब्रह्मवर्चसेनान्नाद्येनसमेधयस्वाहाएकांसमिधंजुहोति॥ अग्नयइदं॥
अग्नयेसमिधावाहार्षमितिसर्वंमंत्रमुच्चार्यद्वेजुहोति॥ अग्नयइदं॥ अ
ग्नयेसमिधमैत्र्याहार्षमितिसर्वंमंत्रमुच्चार्यचतस्रोजुहोति॥ अग्नयइ

हि॰ग्र॰म॰ दं ॥ नात्र समिद्ध्यामित्यूहः ॥ यथा समिधेत्यस्य काष्ठसामान्यवाचित्वात् ॥
६९ ततः आचार्यः ॥ ततः इध्मसन्नहनादि संस्थाजपांतं कर्म समाप्य ॥ ब्रह्म
चारिणः कर्तव्यानि व्रतान्युपदिशेत् ॥ न गायेन्न रोदेन्न नृत्य दन्वी स्यात् ।
इत्येवमादीनि ब्रह्मचारी प्रकरणस्थधर्मोक्तानि ॥ ततो ब्रह्मचारी देशाका
लौ संकीर्त्य ब्रह्मचर्याश्रमविहितसकलव्रतानां ग्रहणं यावत् समावर्तन
मग्न्यादि संनिधौ यथाशक्ति करिष्य इति संकल्प्य उपस्थाय देवता अभि
संधायोपतिष्ठते ॥ अग्ने व्रतपते व्रतं चरिष्यामि ॥ तच्छकेयं तन्मे राध्यतां ॥ ६९
वायो व्रतपते व्रतं च॰ तां । आदित्य व्रतपते व्रतं चरिष्या॰ तां ॥ व्रतानां
व्रतपते व्रतं च॰ तां ॥ इति स्वीकृत्य समावर्तने एतेषां विसर्गः कार्यः ॥

अंतराम्नातानां विशेषव्रतानां ग्रहणत्यागयोस्तत्र तत्रोक्तत्वात् ॥ ततो गु
मी रुर्दक्षिणं हस्तं दर्शयित्वा रात्रि गौर भावे गुंजोपरि मितं स्वर्णं पितुरपि स्याद्धर
दानं ॥ ततो मंत्रं वाचयित्वाचार्यो माणवकमुत्थापयति ॥ उदायुषा स्वायु
षोदोषधीनां रसेनोत्पर्जन्यस्य शुष्मेणोदस्थाममृतां अनु ॥ इति आ
चार्यः सूर्यायत्वां परिददे ॥ परिदेहीति माणवकः ॥ आचार्यः सूर्य एष ते पु
त्रः सं ते परिददामीति ॥ ततो ब्रह्मचारी वा आचार्यो वा आदित्यमुपति
ष्ठते ॥ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् ॥ पश्येम शरदः शतं जीवेम
शरदः शतं नंदाम शरदः शतं मोदाम शरदः शतं भवाम शरदः शतं शृण
वाम शरदः शतं प्रब्रवाम शरदः शतमजीताः स्याम शरदः शतं ज्योक

चसूर्येंदन्हो॥इतिआचार्योदंडंप्रयच्छति॥अग्निष्टआयुःप्रतरांकृणोत्व
ग्निष्टेपुष्टिंप्रतरांदधात्विंद्रोमरुद्भिरिहतेदधात्वादित्यस्तेवसुभिरा
दधात्विति॥ततःस्तूष्णींभिक्षापात्रमतिरिक्तंप्रदायाहभिक्षाचर्यंचरेति॥
ततोब्रह्मचारीओमित्याज्ञामादायप्रथमंमातरंमातृसमांवाअप्रत्या
ख्यायिनींभिक्षेत॥भवतिभिक्षांदेहीति॥भवान्भिक्षांददात्वितिपुमांसं
संसप्रथमंभिक्षितमादायाचार्यायनिवेदयति॥भैक्ष्यंभोइति॥आर्ये
स्तकृह्णाति॥ततोरातिकुलेषुभिक्षेत॥ततआचार्योबटोःपूर्वंप्रज्ञातं
निहितंवासःप्रतिगृह्णाति॥यस्यतेप्रथमवास्यंहरामस्तंत्वाविश्वे
अवंतुदेवास्तंत्वाभ्रातरःसुहृदोवर्धमानमनुजायंतांबहवःसुजात

मिति॥ततःउपनयनांगंत्रिवृदन्नहोमंपुण्याहवाचनंचकरिष्ये॥इतिसं
कल्प्यउत्तरीयाहुत्वाश्रद्धांमेधेप्रीयतामितिवदेत्॥ततस्त्र्यहंव्रतमुप
दिशति॥इक्षुविकारलवणमाषमुद्गादिधान्यमधुमांसानिनभोक्तव्या
नि॥उपरिशायनंमृन्मयेनजलपात्रेणश्रद्धायस्वो छिष्टदानादिवाचायन
चनकार्यं॥उभौकालौभिक्षाचर्यंसायमुपक्रम्यउभौकालौसायंसायं
वाअग्निकार्यंकार्यंइतिब्रह्मचारीश्रुत्वादशकालौसंकीर्यममसावित्री
ग्रहणाधिकारसिध्यर्थंअभ्याहितसनिधौयथाशक्तित्र्यहव्रतग्रहणं
करिष्येइतिसंकल्प्य॥उपस्थायदेवताभिसंधायोपतिष्ठते॥अग्ने
व्रतपतेव्रतंचरिष्यामी॥त्यादित्र्यहव्रतस्वीकृत्यचतुर्थदिवसेउत्तरीत्या

हि॰ब्र॰म॰ विसर्गः कार्यः ॥ ततः आचार्यः गायत्र्युपदेशार्थं उदगग्रे कूर्चे प्राङ्मुख
७१ उपविशति ॥ शश्वद्भूतस्याचार्यस्य हीमात्वद्योष मिति ॥ ततो ब्रह्म
चारी आदित्यायांजलिं नमस्कारं विधाय आचार्यस्य दक्षिणं पादं सकु
ष्ठिकं सव्यान्वारब्धेन दक्षिणेन हस्तेनावमृज्येत्युपसंग्रहणं कार्यं ॥ द
क्षिणं बाहुं सव्यान्वारब्धं श्रोत्रसमं प्रसार्य अमुकप्रवरान्विता अमु
कगोत्रोत्पन्नामुकशर्माऽहं भो अभिवादये इत्युच्चारयन् शिरोवन
तिपूर्वकं आचार्यस्य नमस्कारकरणं अभिवादनं व्यावहारिकेण ना
म्नाकार्यं ॥ ततः आचार्येण आयुष्मान् भवामुकशर्मन् ॥ इति प्लुतान्त्यस्व ७१
रोच्चारणेन प्रयुक्ताशीर्वादो विनयावनतो भूत्वा सावित्रीमु खेसर्वे

दारंभार्थत्वेन प्रथमं सावित्र्युपदेशं वांछन् अध्येष्यमाणो वचनद्वयात्म
केन मंत्रेणैकश्रुत्याह ॥ अधीहि भो सावित्रीं भो अनुब्रूहीति ॥ ततः आचा
र्यः बटुमभिमंत्रयते ॥ गणानां त्वा गणपतिं हवामहे॰ सादनमिति ॥ त
तः सर्ववेदारंभार्थत्वेन सावित्री पठितोऽ ईचं शोनवानमिति वाचयति ॥ ओं भू
स्तत्सवितुर्वरेण्यं॰ भुवो भर्गो देव॰ महि ॥ स्वः धियो यो न॰ त ॥ ओं भूर्भु
वस्तत्सवितु॰ धीमहि ॥ स्वः धियो यो न॰ त ॥ २ ओं भूर्भुवः सुवः तत्सवितु॰
यात् ॥ ३ एवमुच्चारणाशक्तो यथाशक्ति वाचयति ॥ तैत्तिरीयकाणां गाय
त्र्यारंभेणैव सर्ववेदारंभो भवति ॥ ततः आचार्यः कर्मांगदेवताप्रीत्यर्थं त्रा
तद्वयं शतं वा अत्यशक्तौ दशाधिकान् ब्राह्मणान् यथाकालं यथोपप

हि॰क्रम॰ न्नेनभोजयिष्येइतिसंकल्प्यभोजयेत्॥पुनःकर्मांगदेवताप्रीत्यर्थंगंध
७२ तांबूलादिभिःब्राह्मणपूजनंभूयसीदक्षिणादानंचकरिष्येइतिसंक
ल्प्यकृत्वा॥अग्नेतेजस्विनीत्यादिमंत्रैराशिषोग्राह्या॥ततःप्रमादात्कु
र्वतांकर्मेतिकर्मसाद्गुण्यायविष्णुंस्मरेत्॥इतिप्रथमदिवसेगाय
त्र्युपदेशांतकर्म॥ ॥अथयथाकालप्राप्तमाध्यान्हसंध्या॥ ॥प्राङ्मु
खःकुशपाणिःत्रिराचम्यद्विरोष्ठौसंमृज्यसव्यपाणिपादौशिरश्चक्षु
षीनासिकेश्रोत्रेचप्रोक्ष्यहृदयंचालभ्यापउपस्पृश्यइत्याचमनंकृ ७२
त्वा॥अत्रपौराणोक्तमाचमनं॥केशवादित्रिभिःपीत्वाद्वाभ्यांप्रक्षा
लयेत्करौ॥द्वाभ्यामोष्ठौतुसंमृज्यद्वाभ्यामुन्मार्जनंभवेत्॥एकेन

हस्तौप्रक्षाल्यपादावप्यशिरोरपि॥आस्यनासाक्षिकर्णांश्चनाभिहृत्कं
भुजौस्मृतौ॥एवमाचमनंकृत्वासाक्षान्नारायणोभवेत्॥गायत्रीशिरसा
सार्द्धंजपेद्व्याहृतिपूर्विकां॥दशप्रणवसंयुक्तांत्रिरयंप्राणसंयमः॥पू
रकःकुंभकश्चैवरेचकश्चक्रमेणचेति॥दक्षिणेरेचयेद्वायुंवामेनापूरि
तोदरं॥कुंभेनधारयेन्नित्यंप्राणायामंविदुर्बुधः॥ॐभूः ॐभुवः ॐ
स्वः।ॐमहः।ॐजनः।ॐतपः।ॐसत्यं।ॐतत्सवितु॰दयात्॥ॐ
मापोज्योतीरसोमृतंब्रह्मभूर्भुवःस्वरोम्॥इतिसप्तव्याहृतिकासशि
रस्कांगायत्रींपूरककुंभकरेचकक्रमेणत्रिरभ्यसेदथवाकुंभकेनत्रिरभ्य
सेदितिप्राणायामंकृत्वा॥संध्यांध्यायेत्॥मध्यान्हसंध्यायुवानाश्च

द्वि॰ब्र॰म॰ ताम्श्वेतवर्णांश्वेतमाल्यानुलेपनाश्वेतवस्त्रावृषभारूढारुद्रदेवत्या
७३ दक्षिणाग्न्युपस्थानायजुर्वेदसंविताद्वितीयारुद्रसंध्याधर्मवतीनाम्नी
तिध्यात्वा॥ममउपात्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंमध्यान्ह
संध्योपासिंकरिष्येइतिसंकल्प्य॥ आरभेत॥ आयातुवरदादेवी
अक्षरंब्रह्मसंवितं॥गायत्रीछंदसांमातेदंब्रह्मजुषस्वमे॥यदन्हा
त्कुरुतेपापंतदन्हात्प्रतिमुच्यते॥यद्रात्रियात्कुरुतेपापंतद्रात्रिया
त्प्रतिमुच्यते॥सर्ववर्णेमहादेविसंध्याविद्येसरस्वति॥अजरेअ ७३
मरेदेविसर्वदेविनमोस्तुते॥ओजोसिसहोसिबलमसिभ्राजोसि
देवानांधामनामासिविश्वमसिविश्वायुःसर्वमासिसर्वायुरभीभू

रोंगायत्रीमावाहयामिसावित्रीमावा॰सरस्वतीमावा॰छंदर्षीनावा॰श्रि
यमावाहयामिन्द्रियमावाहयामि॥इतिआवाह्य॥ननःकुर्वीरात्मानमा
र्जयति॥आपोहिष्ठामयोभुवस्तानऊर्जेदधातन॥महेरणायचक्षसे॥
योवःशिवतमोरसस्तस्यभाजयतेहनः॥उशतीरिवमातरः॥तस्माअरं
गमामवोयस्यक्षयायजिन्वथ॥आपोजनयथाचनः॥ततःससथत्रय
माकाशेवरवत्रयमस्तके॥नकारांतेत्रिभिःपादाबेवमार्जनलक्षणं॥त
तःआपोभिमंत्रयति॥आपोवाइदं सर्वविश्वाभूतान्यापःप्राणावाआ
पःपशवआपोन्नमापोमृतमापःसम्राडापोविराडापःस्वराडापःछं
दांस्यापोयजूंष्यापःसत्यमापःसर्वादेवताआपोभूर्भुवःस्वरा

प ओं म्॥ इत्यभिमंत्रयेत्॥ ततः प्राश्नाति॥ आपः पुनंतु पृथिवीं पृथिवी पू
ता पुनातु मां॥ पुनंतु ब्रह्मणस्पतिर्ब्रह्म पूता पुनातु मां॥ यदुच्छिष्टम
भोज्यं यद्वा दुश्चरितं मम॥ सर्वं पुनंतु मामापो सतां च प्रतिग्रहं स्वाहा॥
ततः आचम्य मार्जयति॥ दधिक्राव्णो अकारिषं जिष्णो॰ षत्॥ आपो
हिष्ठा मयोभुव॰ योवः शिवतमो र॰ तस्मा अरंगमामवो॰ च नः॥ हिर
ण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्विंद्रः॥ अग्निं या गर्भं
दधिरे विरूपास्तान आपः शं स्योना भवंतु॥ यासां राजा वरुणो याति
मध्ये सत्यानृते अवपश्यं जनानां॥ मधुश्चुतः शुचयो याः पावकास्ता
न आपः शं स्योना भवंतु॥ यासां देवा दिवि कृण्वंति भक्षं या अंतरिक्षे ब ७४

हुधा भवंति॥ याः पृथिवीं पयसोदंति शुक्रास्तान आपः शं स्योना भवंतु॥ शि
वेन मा चक्षुषा पश्यतापः शिवया तनुवोपस्पृशत त्वचं मे॥ सर्वां अग्नीं
रप्सुषदो हुवे वो मयि वर्चो बलमोजो निधत्त॥ पवमानः सुवर्जन इत्यनु
वाकेन मार्जयित्वा॥ द्रुपदादिवन्मुमुचानः॥ स्विन्नः स्नात्वी मलादिव॥ पूतं
पवित्रेणेवाज्यं॥ आपः शुंधंतु मेनसः॥ इति मार्जनावशिष्टा आपो नु मं
त्र्य त्यजति॥ ततः उत्थायांजलिना जलमादाय सव्याहृतिकां गायत्रीं प
ठित्वोर्ध्वं मुत्क्षिप्य श्रीसूर्यायेदमर्घ्यमिति वारत्रयं सूर्याभिमुखं दद्यात्॥ त
त्र कारिका॥ ईषन्नम्रः प्रभाते तु मध्याह्ने ऋजु संस्थितः॥ द्विजोर्घ्यं प्रक्षि
पेद्देवं सायं तूपविश्य भुवि॥ ततः आत्मानं प्रदक्षिणी कुर्वन्॥ असावा

हि॰ब्र॰स॰ ७५ दित्योब्रह्मेति जपति॥ ततः आचम्य प्राणानायम्य॥ ऊर्ध्वबाहुरादित्यमुप
तिष्ठते॥ उद्वयंतमसस्परिपश्यंतो ज्योतिरुत्तरं॥ देवं देवत्रा सूर्यमगन्म
ज्योतिरुत्तमं॥ उदुत्यंजातवेदसं देवं वहंति केतवः॥ दृशे विश्वाय सूर्यं॥
चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः॥ आप्रा द्यावापृथि
वीअंतरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च॥ तच्चक्षुर्देवहितं पुरस्ता
च्छुक्रमुच्चरत्॥ पश्येमशरदः शतं॥ जीवेमशरदः॰ नंदा॰ मोदाम॰ भवा॰
शृणवाम॰ प्रब्रवा॰ मजीता॰ ज्योक्च सूर्यंदृशे॥ यउदगान्महतोर्णवा
द्विभ्राजमानः सरिरस्यमध्यात्सूर्यो विपश्चिन्मनसापुनातु॥ ततः उप ७५
विश्यसंस्रवंतु दिशोमयि समागच्छंतु सो नः॥ सर्वेकामा अभियं

तुनः प्रिया अभिस्रवंतुनः उप्रियाः॥ अभिवादयेत्॥ विश्वामित्राघम
र्षणकौशिकेति त्रिप्रवरान्वितकौशिकगोत्रोत्पन्नोहं यजुर्वेदस्य तैत्तिरीयशा
खांतर्गत हिरण्यकेशीशाखाध्यायी अमुकशर्माहं भोः अभिवादयामि॥
उपनयनवत्॥ अभिवादनंकार्यं॥ अत्र अभिवादनं संध्यांते वा कर्तव्यं॥
प्राणानायम्य अपउपस्पृश्य॥ अपक्रामंतु ते भूता ये भूता भूमिसंस्थि
ता॥ ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया इति भूशुद्धिं विधाय॥ पृथ्वी
त्वयाधृता लोका देवि त्वं विष्णुना धृता॥ त्वं च धारय मां देवि पवित्रं कुरु
चासनं॥ इति भूमिं संप्रार्थ्य॥ अंगुष्ठाग्रे तु गोविंदं तर्जन्यां तु महीधरं॥ म
ध्यमायां हृषीकेशं अनामिक्यां त्रिविक्रमं॥ कनिष्ठिक्यां न्यसेद्विष्णुं करम

ध्येतुमाधवं॥इतिकरयोःप्रत्येकमंगुलीषुकरतलयोःगोविंदादिषण्णामा
निन्यस्य॥पादादिषुभूरादिन्यसेत्॥भूःपद्भ्यांनमः॥भुवःजानुभ्यां॰
स्वःकटिभ्यां॰महःनाभ्यै॰जनःहृदये॰तपःकंठाय॰सत्यंललाटाय॰प
रब्रह्मशिरसेस्वाहा॥तत्सवितुब्रह्मात्मनेहृदयायनमः॥वरेण्यंविष्ण्वा
त्मनेशिरसेस्वाहा॥भर्गोदेवस्यरुद्रात्मनेशिखायैवषट्॥धीमहिपर
मात्मनेकवचायहुं॥धियोयोनःज्ञानात्मनेनेत्रत्रयायवौषट्॥प्रचोदया
त्सत्यात्मनेअस्त्रायफट्॥तर्जन्यंगुष्ठस्फोटनेनप्राचीदिशां दिग्बंधं
कृत्वा॥गायत्र्यागायत्रीछंदोविश्वामित्रऋषिःसवितादेवताअग्निर्मुखंब्र
ह्माशिरोविष्णुर्हृदयंरुद्रःशिखापृथिवीयोनिःप्राणापानव्यानोदान

समानासप्राणाश्वेतवर्णासांख्यायनसगोत्रागायत्रीचतुर्विंशत्यक्षरा
त्रिपदाषट्कुक्षिःपंचशीर्षोपनयनेविनियोगः इतिपाठेनगायत्र्याःछं
दृषिस्वरूपादिज्ञात्वा॥ॐभूरादिनापूर्ववत्॥प्राणायामंकृत्वा॥उपात्त
दुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंअमुकसंख्ययागायत्रीजपमहंक
रिष्ये इतिसंकल्प्य॥अथमुद्रा॥सुमुखंसंपुटंचैववितंविस्तृतंतथा॥
द्विमुखंत्रिमुखंचैवचतुःपंचमुखंतथा॥षण्मुखाधोमुखंचैवव्यापकांज
लिकंतथा॥शकटंयमपाशंचग्रथितंचोल्मुकोल्मुकं॥प्रलंबंमुष्टिकंचै
वमत्स्यःकूर्मोवराहकं॥सिंहाक्रांतंमहाक्रांतंमुद्गरंपल्लवंतथा॥एता
मुद्रानजानातिगायत्रीनिष्फलाभवेत्॥अष्टोत्तरशतंअष्टाविंशतिवा

त्रि·ब्र·म·
११

यथाशक्तिवागायत्रीजपंसव्याहृतिकमेवंकुर्यात् ॥ ॐ भूः ॐ भुवः ओं स्व
वः ओं महः ॐ जनः ओं तपः ॐ सत्यं ॥ सुरभिर्ज्ञानशूर्पं च योनिः कू
र्मोथ पंकजं ॥ लिंगं निर्याणमुद्राश्च जपांते षट् प्रदर्शयेत् ॥ तत्सवितु
र्हृदयायनमइतिपुनःषडंगन्यासंकृत्वा ॥ नमोब्रह्मण्यदेवायगोब्राह्म
णहितायच ॥ जगद्धितायकृष्णायगोविंदायनमोनमोगोविंदायनमोन
मः ॥ उत्तमेशिखरेजातेभूम्यांपर्वतमूर्धनि ॥ ब्राह्मणेभ्योभ्यनुज्ञातागं
च्छदेवियथासुखं ॥ स्तुतोमयावरदावेदमाताप्रचोदयंतीपवनेद्विजाता ॥
आयुःपृथिव्यांद्रविणंब्रह्मवर्चसंमह्यंदत्त्वाप्रजातुब्रह्मलोकं ॥ घृणिः
सूर्यआदित्योनप्रभावात्यक्षरंमधुक्षरंतितद्रसं ॥ सत्यंवैतद्रसमा ११

पोज्योतीरसोमृतंब्रह्मभूर्भुवःस्वरोम् ॥ इतिसंध्यांविसृज्यआचम्यप्रा
णानायम्यविष्णुंस्मरेत् ॥ नमोस्त्वनंतायसहस्रमूर्तयेसहस्रपादाक्ष
शिरोरुबाहवे ॥ सहस्रनाम्नेपुरुषायशाश्वतेसहस्रकोटियुगधारिणेन
मः ॥ ॥ इतिमध्यान्हसंध्या ॥ ॥ अथसायंसंध्या ॥ आचमनप्राणाया
मादिपूर्ववत् ॥ सायंसंध्यावृद्धाकृष्णाकृष्णावर्णाकृष्णवस्त्राकृष्णमाल्या
नुलेपनागरुडवाहनाविष्णुदेवत्याआहवनीयाग्न्युपस्थानासामवेदसं
वितातृतीयाविष्णुसंध्यासत्यवतीनाम्नीतिध्यात्वा ॥ ममउपात्तदुरित
क्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंसायंसंध्योपासिंकरिष्येइतिसंकल्प्य ॥
आवाहनमार्जनोदकाभिमंत्रणांतंपूर्ववत् ॥ संध्यात्रयेपिसमानं ॥ प्रात्रा

नेपृथकमंत्राः॥ अग्निश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यः॥ पापेभ्यो
रक्षंतां॥ यदन्हापापमकार्षं॥ मनसावाचाहस्ताभ्यां॥ पद्भ्यामुदरेणशिश्ना॥
अहस्तदवलुंपतु॥ यत्किंचिदुरितंमयि॥ इदमहंमाममृतयोनौ॥ सत्येज्यो
तिषिजुहोमिस्वाहा॥ इतिप्राश्याचम्य॥ दधिक्राव्णोअकारिषं॰ आपोहि
ष्ठा ३ हिरण्यवर्णा ४ पवमानःसुवर्जनइत्यनुवाकेनमार्जनादि अर्घ्यांतं
समाप्योच्चमनप्राणानायम्यभूर्भुवादिअंगुष्ठाग्रेतुपूर्ववत्॥ जपांतंस
माप्योत्थायमुकुलितकरःप्रत्यङ्मुखउपतिष्ठते॥ इमंमेवरुणश्रुधी॰ के॥
तत्त्वायामि॰ षीः॥ त्वन्नोअग्नेव॰ स्मत्॰॥ सत्वन्नोअग्ने॰ एधि॥ यच्चि
द्धितेविशोयथाप्रदेववरुणव्रतं॥ मिनीमसिद्यविद्यवि॥ यत्किंचेदंवरु ७८

णदैव्येजनेभिद्रोहं मनुष्याश्चरामसि॥ अचित्तीयत्तवधर्मायुयोपिममानः
स्तस्मादेनसोदेवरीरिषः॥ कितवासोयद्रिरिपुर्नदीवियद्वाघासत्यमुतयन्न
विद्म॥ सर्वातानिविष्यशिथिरेवदेवाथातेस्यामवरुणप्रियासः॥ इत्युपस्थाय॥
याꣳसदासर्वभूतानिस्थावराणिचराणिच॥ सायंप्रातर्नमस्यंतिसामासं
ध्याभिरक्षत्वोन्नमःप्रतीच्यैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्च
नमोनमउदीच्यैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमःप्रा
च्यैदिशेयाश्चदेवताएतस्यांप्रतिवसंत्येताभ्यश्चनमोनमोदक्षिणायैदि
शेयाश्चदेवताएतस्यांप्रति॰ नमोनमऊर्ध्वायैदिशेयाश्च॰ नमोनमोध
रायैदिशेयाश्चदेव॰ नमोनमोवांतरायैदिशेयाश्चदेव॰ नमोनमोगंगाय

मुनयोर्मध्येयेवसंतितेमेप्रसन्नात्मानश्चिरंजी विलंवर्धयंतिनमोगंगा
यमुनयोर्मुनिभ्यश्चनमोनमोगंगायमुनयोर्मुनिभ्यश्चनमः॥सद्ग्स्त्र
वंतुवित्यादिस्कवरोमित्यंतपाठेनसंध्यांविसृज्याचम्यप्राणानायम्यवि
ष्णुंस्मरेत्॥ ॥इतिसायंसंध्या॥ ॥अथप्रातःसंध्या॥आच
मनप्राणायामादिविधायपूर्ववत्॥प्रातःसंध्याकुमारीरक्तारक्तवर्णा
रक्तवस्त्रारक्तमाल्यानुलेपनाहंसवाहनाब्रह्मदैवत्यागार्हपत्याग्न्यु
पस्थानाऋग्वेदसंविताप्रथमाब्रह्मसंध्यावेदवतीनाम्नीतिध्यात्वाममं
उपात्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंप्रातःसंध्योपास्तिंकरिष्येइति ७१
संकल्प्य॥आयातुवरदादेवीत्यादिजलाभिमंत्रणांतपूर्ववत्॥सू

र्यश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यः॥पापेभ्योरक्षंतां॥यद्रात्र्यापा
पमकार्षं॥मनसावाचाहस्ताभ्यां॥पद्भ्यामुदरेणशिश्ना॥रात्रिस्तदव
लुंपतु॥यत्किंचिदुरितंमयि॥इदमहंमाममृतयोनौ॥सूर्येज्योतिषि
जुहोमिस्वाहा॥इतिप्राश्यादाचम्य॥दधिक्राव्णइत्यादिगायत्रीजपांतं
पूर्ववत्॥जपांतेउत्थायबद्धांजलिः॥पुरस्तादादित्यमुपतिष्ठते॥मित्र
स्यचर्षणीधृतश्रवोदेवस्यसानसिं॥सत्यंचित्रश्रवस्तमं॥मित्रोजना
न्यातयतिप्रजानन्मित्रोदाधारपृथिवीमुतद्यां॥मित्रःकृष्टीरनिमिषा
भिचष्टेसत्यायहव्यंघृतवद्विधेम॥प्रसमित्रमर्तोअस्तुप्रयस्वान्यस्त
आदित्यशिक्षतिव्रतेन॥नहन्यतेनजीयतेत्वोतोनैनमंहोअश्नो

त्यंतितोनदूरात्॥यच्चिद्धितेविशोयथाप्रदेववरुणव्रतं।मिनीमसिद्यविद्यवि॥
यत्किंचेदं॰षः।कितवासो॰यासः॥यादृंमदासवभू॰रक्षत्वोनमःप्राच्यैदिशे।
याश्चदेवताइत्यादिसंध्याविसर्गांतंपूर्ववत्कृत्वाचम्यप्राणानायम्यप्रमादा
त्कुर्वतांकर्मेतिविष्णुंस्मरेत्॥ ॥इतिप्रातःसंध्या॥ ॥अथसायंसं
ध्योत्तरमग्निकार्यं॥ ॥सायमुपक्रम्योभौकालौसायंसायंवाग्निका
र्यंकरोति॥ब्रह्मचारीआचम्यप्राणानायम्यदेशकालौसंकीर्त्यममउपा
त्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थंसायमग्निकार्यंहोमंकरिष्येइतिसा
यं॥प्रातरग्निकार्यंहोमंकरिष्येइतिप्रातः॥इतरत्समानं॥अग्निंप्रज्वा ८०
ल्य॥चत्वारिशृंगेतिध्यानंकृत्वा॥यथाहतदुसवोगोर्यमितिपरिसमूह्य

परिस्तीर्य॥अदितेनुमन्यस्वेतिपूर्ववत्परिषेकंकृत्वाष्टौसमिधआदाय
व्यस्ताभिर्व्याहृतीभिस्तिस्रःसमस्ताभिश्चैकेतिचतस्रोहुत्वाउत्तरैश्च
तुभिर्मंत्रैश्चतस्रोजुहोति॥एषातेअग्नेसमित्तयावर्धस्वचाचप्याय
स्व॥वर्द्धिषीमहिचवयमाचप्यासिषीमहिस्वाहा॥अग्नयइदं॥मेधांम
इंद्रोददातुमेधांदेवीसरस्वती॥मेधांमे॰जोस्वाहा॥इंद्रायसरस्वत्या
श्विभ्यामिदं॥अप्सरासुचयामेधागंधर्वेषुचयन्मनः॥दैवीमेधामेधाम
नुष्यजासामांमेधासुरभिर्जुषतांस्वाहा॥मेधायाइदं॥आमांमेधासु
रभिर्विश्वरूपाहिरण्यवर्णाजगतीजगम्या॥ऊर्जस्वतीपयसापिन्वमा
नासामांमेधासुप्रतीकाजुषंतांस्वाहा॥मेधायाइदं॥पूर्ववत्परिस

हि॰अ॰म॰ मूह्यपरिषेकविसर्गंकृत्वाग्निमुपतिष्ठते॥यत्तेअग्नेतेजस्तेनाहंतेजस्वी
८१ भूयासंयत्तेअग्नेवर्चस्तेनाहंवर्चस्वीभूयासंयत्तेअग्नेहरस्तेनाहंह
रस्वीभूयासं॥मयिमेधांमयिप्रजांमय्यग्निस्तेजोदधातुमयिमेधांम
यिप्रजांमयीइंद्रियंदधातुमयिमेधांमयिप्रजांमयिसूर्योभ्राजोद
धातु॥इति॥त्र्यायुषंजमदग्नेःकश्यपस्यत्र्यायुषंयद्देवानांत्र्यायुषं
तन्मेअस्तुत्र्यायुषंतन्मेअस्तुत्र्यायुषंइत्याचाराद्भस्मधृत्वाश्रद्धांमेधां
यशःप्रज्ञांविद्यांबुद्धिमितिअग्निंसंप्रार्थ्यप्रमादात्कुर्वतामितिविष्णु ८१
स्मरेत्॥ ॥इत्यग्निकार्यं॥ ॥ततउक्तप्रकारेणोपसंग्रहणमभि
वादनंकार्यं॥ब्रह्मचारीअन्योवासव्यान्वारब्धंदक्षिणंबाहुंश्रोत्र

समंप्रायोक्तप्रकारेणास्वसंनिहितान्गुर्वादीन्प्रत्यभिवादनंज्ञानमभिवा
दयेदन्यान्नमस्कुर्यात्देव॥अथभोजनविधिः॥आयुष्मान्प्राङ्मुखो
भुंक्तेयशस्वीदक्षिणामुखः॥श्रीकामःपश्चिमेभुंक्तेनकदाचिदुदङ्मुखः॥
इत्यभिसंधायोपविश्यवामहस्तेनभोजनपात्रंधृत्वापरहस्तेनजलमा
दायपरितःसिंचति॥ऋतंत्वासत्येनपरिषिंचामिइतिसायंपरिषिंचति॥
सत्यंत्वर्तेनपरिषिंचामिइतिप्रातः॥इतीशानीमारभ्येशानांतंहस्तेनान्न
मलंघयन्सर्वतोन्नंपरिषिच्य॥व्याहृतिचतुष्टयेनभूमावाहुतिचतुष्ट
यंप्राक्संस्थंदत्वापुनःपरिषिच्यान्नमभिमंत्रयति॥अन्नपतेन्नस्यनो
देह्यनमीवस्यशुष्मिणः॥प्रप्रदातारंतारिषऊर्जंनोधेहिद्विपदेचतु

ष्यदेइति॥ततोगोकर्णाकृतिहस्तेनमाषमग्रंजलमादायांगुष्ठमूलेनत्र्यमृतोपस्तरणमसीतिसकृदाचम्य॥प्राणादिपंचभ्यः प्रणवादिभ्यश्च
चतुर्थ्यंतेभ्यस्वाहांतेभ्यः पंचाहुतयोमुक्तकनिष्ठेनकरेणान्नस्यमुखे
जुहोति॥ॐ प्राणायस्वाहा॥अपानायस्वाहा॰ व्यानाय॰ उदानाय॰ समा
नाय॰ आत्मनेस्वाहेत्यादि॥ इदंप्राणाग्निहोत्रं प्राणोपासकानांविहित
मपिसर्वैश्चासाराक्रियते॥क्षारलवणमाषमुद्गादिवर्जमन्नंकांस्यादिव्य
तिरिक्तेपात्रेमौनेनभुक्त्वा अमृतापिधानमसीत्युत्तरापोशनंकृत्वाभुक्त्वा
चमनोत्तरंद्विरान्तस्याग्निसंनिधौवसेत्॥चतु र्थदिवसीयव्रतविस
र्गांतमग्निधारणंकृत्वा॥ ॥चतुर्थदिवसेप्रातराचार्यः कृतनित्य ८२

प्रयोगः॥आचार्यश्चंद्रानुकूल्यशुभेदिनेप्राङ्मुखउपविश्यब्रह्मचा
रिणांप्रातरग्निकार्योत्तरेउपवेश्यदेश॰ अस्यब्रह्मचारिणोवेदाध्ययन
सिद्धिद्वाराश्रीपरमेश्वरप्री॰ सौम्यव्रतांतर्गतंशुक्रियव्रतोपाकरणंक
रिष्ये॥तदंगंगणपतिपूजनादिकंकरिष्येइतिसंकल्प्यकृत्वाब्रह्मचा
रिणोवपनंकटिसूत्रादिकंचपूर्ववद्दत्वासायंहोमानंतरंमस्तमितादि
त्यग्रामात्प्रागुदग्वाजलसमीपेगत्वाप्राङ्मुखोब्रह्मचारीसहितःउप
विश्यशुक्रियव्रतांगमुद्वनादिकर्मक रिष्येइतिसंकल्प्य॥भूसं
स्कारंविधायसमुद्भवनामानलौकिकाग्निंप्रतिष्ठाप्यप्रज्वाल्यस
मित्त्रयमादायश्रद्धएहीत्यादिप्राणायामांतंकृत्वाशुक्रियव्रतहोमा

हि॰अ॰म॰ स्वेकर्मणि यक्ष्यमाणा देवताः परिग्रहीष्यामि तूष्णीं समिद्भिः अ
९० ग्निं वायुं आदित्यं प्रजापतिं चोदुंबरसमिद्भिर्यक्ष्ये प्रायश्चित्तहोमे
व्याहृतिदेवतांश्चाज्येन यक्ष्ये इत्का समिधोग्नावाधाय प्रोक्षणीद
र्वीं आज्यस्थाली औदुंबरीश्च तस्त्रः समिधः वासः कुशांश्चासाद्य
प्रोक्षणीसंस्कारादिपरिषेकांतं कृत्वा ॥ समिद्धोमः ॥ पृथिवी समित् ॥
तामग्निः समिंधे साग्निं समिंधे ॥ तामहं समिंधे सा मा समिद्धा
युषा तेजसा वर्चसा श्रिया यशसा ब्रह्मवर्चसेनान्नाद्येन समिंतां
स्वाहा ॥ अग्नय इदं॰ अंतरिक्षं समित्तां वायुरित्यादि॰ वायव इदं॰ ९०
द्यौः समित् तामादित्य इत्यादि॰ आदित्यायेदं॰ प्राजापत्यामे समि

दसि॰ मे सि स्वाहा ॥ प्रजापतय॰ ततोन्यूनातिरिक्तदोषपरिहा
रार्थं व्याहृतिहोमं कुर्यात् ॥ ततो ब्रह्मचारी वेदाध्ययनांगं अग्न्यो
हिं संनिधौ शुक्रियव्रतग्रहणं करिष्ये इति संकल्प्य ॥ चतस्रो देव
ता अभिसंधायोपतिष्ठते ॥ अग्ने व्रतपते व्रतं चरिष्यामीत्यादिना
व्रतं स्वीकृत्य सौम्यानुवाकानामादितः ॥ किंचित् किंचिदधीत्य वाससा
समुखं शिरो वेष्टयित्वा ग्रामं प्रविश्य तां रात्रिं वाग्यतस्तिष्ठेत् ॥ उ
दित आदित्ये मुखवेष्टनं विमुच्य कृतनित्यक्रियः अग्निकार्यं कृत्वा ।
वयः सुपर्णा॰ तच्चक्षुर्देवहितं॰ दृशा इत्यंतेन आदित्यमुपस्थाय ॥
तत आदित्यमग्निमन्द्रमानं कुंभं वत्सं हिरण्यं च दृष्ट्वाचार्याय वरं द

त्वाकर्मसाद्गुण्यायविष्णुंस्मरेत्॥ ॥इतिशुक्रियव्रतोपाकरण
प्रयोगः॥आचार्यःप्राङ्मुखउपविश्यब्रह्मचारीसहितआचम्य
प्राणानायम्य। देशका॰ अस्यब्रह्मचारिणोवेदाध्ययनांगत्वेनस्वीकृ
तशुक्रियव्रतोत्सर्जनंकरिष्येइतिसंकल्प्यगणेशपूजनादिकृत्वाप
रिषेकादिपूर्ववत्कृत्वासमिद्धोमेविशेषः॥ द्यौःसमिदितिविलोमप्या
ठेनऔदुंबरीश्चतस्रः॥समिधोहुत्वा॥अग्नेव्रतपतेव्रतमचारिषं
इत्युपस्थानादिविष्णुस्मरणादिपूर्ववत्समानं॥सौम्यव्रतोपाकर
णानंतरशुक्रियव्रतोपाकरणोत्सर्जनेकृत्वासौम्योत्सर्जनंकुर्या
त्॥इतिवेदव्रतोत्सर्जनप्रयोगः॥अथगोदानप्रयोगः॥गावःपृ

थिव्यांदीयंतेयानिस्वाध्यायार्थंचत्वार्यंगानितेषांवपनादिरूपंकर्मगो
दानकर्मेत्युच्यते॥तच्चद्विविधं।एकमुपनयनस्यादौचूडाकरण
रूपं॥द्वितीयमुपनयनानंतरंक्रियमाणंतच्चगोदानंजन्मतोगर्भतो
वाषोडशेवर्षेसमावर्तनात्प्राक्कार्यं॥ब्रह्मचर्यादिव्रतेवाधीत्य
समावर्तिनिकर्तव्यं॥ब्रह्मचर्यकालः॥अष्टाचत्वारिंशद्वर्षाणि
चतुर्विंशतिर्वाद्वादशायावद्ग्रहणंवा॥अथवाशक्तत्वादनित्यत्वाच्च
यथाशक्त्यधीत्यवास्नानंकरोति॥तदागोदानकर्मोक्तंपश्चात्समाव
र्तनात्प्रागेवोदगयनेशुक्लपक्षेगुरुशुक्रवार्धक्याद्यभावेअक्षये
अनधिकेचमासिज्योतिर्विदुक्तकालेदिवसेचौलवत्कार्यं॥कर्ताप्रा

हि॰ग्रन्म॰ ९२

उन्मुखउपवेश्यस्वदक्षिणतःपत्नीतद्दक्षिणतःब्रह्मचारिणंचो
पवेश्यदेशे॰अस्यब्रह्मचारिणआयुर्वर्चोभिवृद्धिद्वाराश्री॰गो
दानकर्मकरिष्ये तदंगंगणपतिपूजनंपुण्याहवाचनंमातृकापू
जनंनांदीश्राद्धंचकरिष्ये इतिसंकल्प्यंकृत्वा॥ उद्धननादिभूसं
स्कारंविधायतत्रसूर्यनामानंलौकिकाग्निंप्रतिष्ठाप्यप्रज्वाल्य
समित्त्रयमादायश्रद्धे एहीत्यादिप्राणायामांतंकृत्वा॥ गोदान
होमाख्येकर्मणियक्ष्यमाणादेवताःपरिग्रहीष्यामीत्यादिव्याहृ
त्यंतंहुत्वानात्रप्रधानहोमः॥ अंगहोमादिसंस्थाजपांतंसर्वंस ९२
माप्य॥ अग्नेःपश्चात्कर्त्तोदक्षिणतोब्रह्मचारीउत्तरतःकेशसंय

यमनार्थंमालाब्रह्मचारीवाकश्चितआनडुहंगोमयंधारयन्नुप
विशति॥ ततश्चौलोक्तप्रकारेणउष्णशीताभिरद्भिःउंदनादिवप
नांतंआचार्यःनापितोवाचौलवत्कुर्यात॥ चूडाकरणकालेय
थाचारधृताभिःसहमध्यशिखासहितं तद्रहितंवावपनमितिविशे
षः॥ गर्त्तकेशसंयमनादिकंचौलवत्कृत्वाचार्यायदक्षिणांसर्पि
ष्मंतमोदनंनापितायदद्यात॥ कर्मांगंदशाधिकब्राह्मणभोज
नंभूयसींदक्षिणांचदत्वाप्रमादादितिविष्णुंस्मरेत॥ ॥इतिश्री
गोदानप्रयोगः॥ ॥अथब्रह्मचारिणःसाधारणव्रतलोपप्राय
श्चित्तं॥ कृतनित्यक्रियः॥ आचार्यःप्रातरग्निकार्यानंतरंब्रह्म

चारीप्राङ्मुखउपविश्य देशकालौ संकीर्त्य अस्य ब्रह्मचारि
णः शौचाचमनसंध्यावंदनदर्भधारणभिक्षाग्निकार्यरहित्य
शूद्रादिस्पर्शनकौपीनकटिसूत्रयज्ञोपवीतमेखलादंडाजिन
त्यागदिवास्वापछत्रधारणपादुकाद्यारोहणमालाधारणोद्व
र्तनानुलेपनजलक्रीडाद्यूतनृत्यगीतवाद्याद्यभिरतिपारख
डादिसंभाषणपर्युषितभोजनादिब्रह्मचारिव्रतलोपदोषपरि
हारार्थं श्रीपरमेश्वरप्रीत्यर्थं होमपूर्वकं कृछ्रत्रयमितममुक
प्रत्याम्नायेनआचरिष्ये॥ तदंगं गणपतिपूजनं पुण्या
हवाचनं च करिष्ये इति संकल्प्य कृत्वा॥ उद्धननादि भूस

[OrderDescription]
,CREATED=06.08.19 16:42
,TRANSFERRED=2019/08/06 at 17:02:29
,PAGES=82
,TYPE=STD
,NAME=S0001343
,Book Name=M-173-HIRVYKESHIY PRAYOG MHESHVAR MDDI MSS
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF

FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF

FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF

FILE82=00000082.TIF
,